# जगद्गुरुकाव्यम् ।

## अेवम्

# गुरुगुणरत्नाकरकाव्यम् ।

श्री जिनशासन आराधना ट्रस्ट
मुंबई

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ नमो नमः श्री गुरुप्रेमसूरये ॥

श्रीपद्मसागरगणिविरचितम्–

# जगद्गुरुकाव्यम्

शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरि-
पादाम्भोजच रीकायमाणाभ्यां

पं–हरगोविन्ददास–बेचरदासाभ्यां संशोधितम्।

**प्रकाशक**

श्री जिनशासन आराधना ट्रस्ट
दुकान नं.५, बद्रिकेश्वर सोसायटी,
८२, नेताजी सुभाष मार्ग, 'ई' रोड,
मरीन ड्राईव, मुंबई – ४०० ००२

वि. सं. २०५६ – वी. सं. २५२६
मूल्य रु. १५/-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# પ્રાપ્તિ સ્થાન

● **શ્રી જિનશાસન આરાધના ટ્રસ્ટ**
શોપ નં. ૫, બદ્રિકેશ્વર સોસાયટી,
મરીન ડ્રાઇવ, 'ઇ' રોડ, નેતાજી સુભાષ માર્ગ,
મુંબઇ-૪૦૦ ૦૦૨.

● **શ્રી જિન શાસન આરાધના ટ્રસ્ટ**
C/o. ચંદ્રકાંત એસ. સંઘવી,
બી/૬, અશોકા કોમ્પલેક્ષ, રેલ્વે ગરનાળા પાસે,
પાટણ (ઉ. ગુજ.), પીન-૩૮૪ ૨૬૫.

● **મૂળીબહેન અંબાલાલ રતનચંદ જૈન ધર્મશાળા,**
સ્ટેશન રોડ, વીરમગામ, (ગુજરાત).

● **બંસીલાલ અંબાલાલ શાહ જૈન યાત્રિક ભુવન**
માણેક ચોક, ખંભાત (ગુજરાત), પીન-૩૮૮ ૬૨૦

● **ચીમનલાલ કલાધર**
સંતકૃપા, બીજે માળે, મ્હસકરવાડા, છેડા રોડ,
જોશી હાઇસ્કુલ પાસે, ડોંબીવલી (પૂર્વ), પીન-૪૨૧ ૨૦૧.
જિ. થાણા (મહારાષ્ટ્ર)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય

"જગદ્ગુરુ કાવ્યમ્" નામના આ નાનકડા ખંડકાવ્યની રચના પૂ. પં. શ્રી પદ્મસાગરગણિવર્યે સં ૧૯૪૬ ના વર્ષે કરેલી છે. રચયિતા પૂજ્યપાદ્ જગદ્ગુરુ શ્રી હીરસૂરિશ્વરજી મહારાજના ગુરુભાઈ પૂ. મહોપાધ્યાય ધર્મસાગર ગણિના શિષ્ય પૂ. પંડિત શ્રી વિમલસાગરગણિના શિષ્ય પૂ. પંડિત શ્રી પદ્મસાગર ગણિ છે. જગદ્ગુરુની હયાતીમાં જ આ કાવ્યની રચના થયેલી છે. તેથી આમાં પ્રાયઃ સ્વર્ગવાસ સુધીની હકીકતો તેમજ સં. ૧૯૪૬ પછીની હકીકતોનો સમાવેશ થતો નથી.

અકબર જેવા યવન રાજાને પ્રતિબોધિત કરીને સમસ્ત હિંદુસ્તાનમાં છ મહિના અમારિ પ્રવર્તનને પ્રવર્તાવનાર જગદ્ગુરુ હીરસૂરિ મહારાજા ના નામથી કોણ અજ્ઞાત હશે ? આ નાનકડા કાવ્યમાં પણ જગદ્ગુરુ અંગે તથા અકબર અંગે ઘણી જ સુંદર હકીક્તોનો સમાવેશ છે.

પ્રસ્તુત કાવ્યને પૂ. જૈનાચાર્યશ્રી ધર્મસૂરીશ્વરજી મ.સા.ના સેવકો એવા પંડિત હરગોવિંદદાસ તથા બેચરદાસે સંશોધન કરી ઘણા વર્ષો પૂર્વે શ્રી યશોવિજય જૈન ગ્રંથમાળાના ચૌદમા મણકા તરીકે પ્રસિદ્ધ કરેલ છે. પુનઃપ્રકાશન પ્રસંગે તેઓ પ્રત્યે કૃતજ્ઞતાનો ભાવ પ્રદર્શિત કરીએ છીએ.

પ્રસ્તુત ગ્રંથના સ્વાધ્યાયથી સૌ કોઈમાં જગદ્ગુરુ પ્રત્યે બહુમાનભાવ વિશેષ પ્રગટે તેવા આશયથી તથા જીર્ણ થઈ ગયેલ ગ્રંથની રક્ષા માટે પુનઃ પ્રકાશિત કરીએ છીએ.

આવા શ્રુતોદ્ધારના કારણોમાં ખૂબ ખૂબ આગળ વધાય તેવી શ્રુતાધિષ્ઠાયિકા સરસ્વતી દેવીને પુનઃ પુનઃ પ્રાર્થના.

*લી. જિનશાસન આરાધના ટ્રસ્ટ*


## ટ્રસ્ટીઓ :

(૧) ચંદ્રકુમાર બાબુભાઈ જરીવાલા

(૨) લલીતભાઈ રતનચંદ કોઠારી

(૩) નવીનચંદ્ર ભગવાનદાસ શાહ

(૪) પુંડરીકભાઈ અંબાલાલ શાહ




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ભાવભરી
# અનુમોદના

શ્રી પદ્મસાગરગણિ વિરચિત
પ્રસ્તુત "જગદ્‌ગુરુ કાવ્યમ્" ના
પ્રકાશનનો લાભ પ. પૂ. આચાર્યદેવ
શ્રીમદ્ વિજય ગુણરત્નસૂરિ મ.સા.ના
અંતેવાસી પૂ. મુનિશ્રી જિનેશરત્ન
વિજય મ.સા. તથા પૂ. મુનિ શ્રી
ધીરેશરત્ન વિજય મ.સા.ના ચાતુર્માસની
સ્મૃતિ રૂપે તેઓના ઉપદેશથી શ્રી મેરુ
ઉદ્યાન જૈન ઉપાશ્રય, શાસ્ત્રીનગર,
ભાવનગર તરફથી જ્ઞાનનિધિમાંથી
લેવામાં આવેલ છે. જ્ઞાનનિધિના આ
સદુપયોગની ભૂરિ ભૂરિ
અનુમોદના કરીએ છીએ.

**શ્રી જિનશાસન**
**આરાધના ટ્રસ્ટ**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

।। નમો નમઃ શ્રી ગુરૂપ્રેમસૂરયે ।।

## ✿ દિવ્યકૃપા ✿

સિદ્ધાંતમહોદધિ સ્વ. આચાર્ય દેવ

*શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજા*

## ✿ શુભાશીષ ✿

વર્ધમાન તપોનિધિ ગચ્છાધિપતિ સ્વ. આચાર્યદેવ

*શ્રીમદ્ વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા*

## ✿ પુણ્યપ્રભાવ ✿

પરમ પૂજ્ય સમતાસાગર સ્વ. પંન્યાસજી

*શ્રી પદ્મવિજયજી ગણિવર્યશ્રી*

## ❖ પ્રેરણા-માર્ગદર્શન ❖

પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્યદેવ

*શ્રીમદ્ વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજ*

## ❀ પ્રકાશક ❀

**શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

દુકાન નં. ૫, બદ્રિકેશ્વર સોસાયટી,

૮૨, નેતાજી સુભાષ રોડ, મરીન ડ્રાઇવ, 'ઇ' રોડ,

મુંબઇ-૪૦૦ ૦૦૨.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# શ્રુતસમુદ્ધારક બનતા પુણ્યાત્માઓ તથા જૈન સંઘો

૧ ભાણબાઇ નાનજી ગડા, મુંબઇ.
(પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય ભુવનભાનુસૂરિ મ.સા. ના ઉપદેશથી)

૨ શેઠ આણંદજી કલ્યાણજી, અમદાવાદ.

૩ શ્રી શાંતિનગર શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
(પ. પૂ. તપસમ્રાટ આચાર્યદેવ શ્રીમદ્વિજય હિમાંશુસૂરિ મ.સા. ની પ્રેરણાથી)

૪ શ્રી શ્રીપાળનગર જૈન ઉપાશ્રય ટ્રસ્ટ, વાલકેશ્વર, મુંબઇ.
(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય રામચંદ્રસૂરિ મ.સા.ની દિવ્યકૃપા તથા પૂ. આચાર્યદેવ શ્રીમદ્વિજય મિત્રાનંદ સૂરિ મ.સા.ની પ્રેરણાથી)

૫ શ્રી લાવણ્ય સોસાયટી શ્વે. મૂ. જૈન સંઘ, અમદાવાદ.
(પ.પૂ. પંન્યાસજી શ્રી કુલચંદ્રવિજયજી ગણિવર્યની પ્રેરણાથી)

૬ નયનબાળા બાબુભાઇ સી. જરીવાલા, હ. ચંદ્રકુમારભાઇ, મનીષભાઇ, કલ્પનેષભાઇ. (પ.પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિ.મ.સા. ની પ્રેરણાથી)

૭ કેશરબેન રતનચંદ કોઠારી, હ. લલિતભાઇ.
(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મ.સા.ની પ્રેરણાથી)

૮ શ્રી શ્વેતાંબર મૂ. ત. જૈન પોષધશાળા ટ્રસ્ટ, દાદર, મુંબઇ.

૯ શ્રી મુલુંડ શ્વે. મૂ. ત. જૈન સંઘ, મુલુંડ, મુંબઇ.
(પૂજ્યપાદ આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ.સા. ની પ્રેરણાથી)

૧૦ શ્રી સાંતાક્રુઝ શ્વે. મૂ. ત. જૈન સંઘ, સાંતાક્રુઝ, મુંબઇ.
(પૂજ્યપાદ આચાર્યદેવ શ્રી હેમચંદ્રસૂરિ મ.સા. ની પ્રેરણાથી)

૧૧ શ્રી દેવકરણ મૂળજીભાઇ જૈન દેરાસર પેઢી, મલાડ (વેસ્ટ), મુંબઇ.
(પ.પૂ. મુનિરાજશ્રી સંયમબોધિ વિ. મ.સા. ની પ્રેરણાથી)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

૧૨ સંઘવી અંબાલાલ રતનચંદ જૈન ધાર્મિક ટ્રસ્ટ, ખંભાત.
(પૂ.આ. શ્રી વસંતપ્રભાશ્રીજી મ. તથા પૂ. સા. શ્રી સ્વયંપ્રભાશ્રીજી મ. તથા પૂ. આ. શ્રી દિવ્યયશાશ્રીજી મ.ની પ્રેરણાથી મૂળીબેનની આરાધનાની અનુમોદનાર્થે.)

૧૩ બાબુ અમીચંદ પનાલાલ આદીશ્વર જૈન ટેમ્પલ ચેરિટેબલ ટ્રસ્ટ, વાલકેશ્વર, મુંબઇ.
(પૂ. મુનિરાજશ્રી અક્ષયબોધિ વિ. મ. તથા પૂ. મુનિરાજશ્રી મહાબોધિ વિ. મ. તથા પૂ. મુનિરાજશ્રી હિરણ્યબોધિ વિ. મ. ની પ્રેરણાથી)

૧૪ શ્રી શ્રેયસ્કર અંધેરી ગુજરાતી જૈન સંઘ, મુંબઇ.
(પૂ. મુનિશ્રી હેમદર્શન વિ. મ. તથા પૂ. મુનિશ્રી રમ્યઘોષ વિ. મ. ની પ્રેરણાથી)

૧૫ શ્રી જૈન શ્વે. મૂ. સંઘ, મંગળ પારેખનો ખાંચો, શાહપુર, અમદાવાદ.
(પ. પૂ. આચાર્યદેવ શ્રી રુચકચંદ્ર સૂરિ મ. સા. ની પ્રેરણાથી)

૧૬ શ્રી પાર્શ્વનાથ શ્વે. મૂ. જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઇ.
(પૂ. મુનિશ્રી કલ્યાણબોધિ વિ. મ. ની પ્રેરણાથી)

૧૭ શ્રી નવજીવન સોસાયટી જૈન સંઘ, બોમ્બે સેન્ટ્રલ, મુંબઇ.
(પૂ. મુનિશ્રી અક્ષયબોધિ વિ. મ. ની પ્રેરણાથી)

૧૮ શ્રી કલ્યાણજી સોભાગચંદ જૈન પેઢી, પીંડવાડા-રાજસ્થાન.
(સિદ્ધાંતમહોદધિ સ્વ. પૂ. આ. શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મ.સા. ના સંયમની અનુમોદનાર્થે)

૧૯ શ્રી ઘાટકોપર જૈન શ્વે. મૂ. ત. સંઘ, ઘાટકોપર (વેસ્ટ), મુંબઇ.
(વૈરાગ્યદેશનાદક્ષ પૂ. આ. શ્રી હેમચંદ્રસૂરિ મ.સા. ની પ્રેરણાથી)

૨૦ શ્રી આંબાવાડી શ્વે. મૂ. ત. સંઘ, અમદાવાદ.
(પૂ. મુનિ શ્રી કલ્યાણબોધિવિજયજી મ.સા. ની પ્રેરણાથી)

૨૧ શ્રી જૈન શ્વે. મૂ. સંઘ, વાસણા, અમદાવાદ.
(પૂ. આ. શ્રી નરરત્નસૂરિ મ. સા. ના સંયમજીવનની અનુમોદનાર્થે પૂ. તપસ્વીરત્ન આ. શ્રી હિમાંશુસૂરીશ્વરજી મ.સા. ની પ્રેરણાથી)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

૨૨ શ્રી પ્રેમવર્ધક આરાધક સમિતિ, ધરણિધર દેરાસર, પાલડી, અમદાવાદ.
(પૂ. ગણિવર્ય શ્રી અક્ષયબોધિ વિજયજી મ.ની પ્રેરણાથી)

૨૩ શ્રી મહાવીર જૈન શ્વે. મૂ. સંઘ, પાલડી, અમદાવાદ.
શેઠ કેશવલાલ મૂળચંદ જૈન ઉપાશ્રય.
(પ. પૂ. આ. શ્રી રાજેન્દ્રસૂરિ મ.સા. ની પ્રેરણાથી)

૨૪ શ્રી માટુંગા જૈન શ્વે. મૂ. ત. સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઇ.

૨૫ શ્રી જીવીત મહાવીર સ્વામી જૈન સંઘ, નાંદિયા (રાજસ્થાન).
(પૂ. ગણિ શ્રી અક્ષયબોધિ વિ. મ. સા. તથા મુનિશ્રી મહાબોધિવિજયજી મ.સા. ની પ્રેરણાથી)

૨૬ શ્રી વિશા ઓશવાળ તપગચ્છ જૈન સંઘ, ખંભાત.
(વૈરાગ્યદેશનાદક્ષ પૂ. આ. શ્રી હેમચંદ્રસૂરિ મ.સા. ની પ્રેરણાથી)

૨૭ શ્રી વિમલ સોસાયટી આરાધક જૈન સંઘ, બાણગંગા, વાલકેશ્વર., મુંબઇ.
(પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય વિજય હેમચંદ્રસૂરિશ્વરજી મ.સા. ની પ્રેરણાથી)

૨૮ શ્રી પાલિતાણા ચાર્તુમાસ આરાધના સમિતિ
(પૂ. આ. હેમચંદ્રસૂરિ મ. ના સં. ૨૦૫૩ના ચાતુર્માસ પ્રસંગે)

૨૯ શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટ. અંધેરી (ઇ).
(પૂ. મુનિશ્રી નેત્રાનંદ વિજયજી મ. સા. ની પ્રેરણાથી)

૩૦ શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વે. મૂ. સંઘ, જૈનનગર, અમદાવાદ.
(પ. પૂ. મુનિશ્રી સંયમબોધિવિજયજી મ.સા. ની પ્રેરણાથી)

૩૧ શ્રી કૃષ્ણનગર જૈન શ્વેતાંબર મૂ. સંઘ, સૈજપુર, અમદાવાદ.
(પ.પૂ. આચાર્યવિજય હેમચંદ્રસૂરીશ્વરજી મ.સા.ના કૃષ્ણનગર મધ્યે સંવત ૨૦૫૨ના ચાતુર્માસ નિમિત્તે પ.પૂ. મુનિરાજશ્રી કલ્યાણબોધિ વિજય મ.સા.ની પ્રેરણાથી)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

૩૨ શ્રી બાબુભાઇ સી. જરીવાળા ટ્રસ્ટ, નિઝામપુરા, વડોદરા.
(પ. પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય વિજય હેમચંદ્રસૂરિશ્વરજી મ.સા. ની પ્રેરણાથી)

૩૩ શ્રી ગોડી પાર્શ્વનાથ ટેમ્પલ ટ્રસ્ટ, પૂના.
(પ્રેરક : પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્‌વિજય જયઘોષસૂરીશ્વરજી મ.સા. તથા પૂ. મુનિરાજશ્રી મહાબોધિવિજયજી મ.સા.)

૩૪ શ્રી શંખેશ્વર પાર્શ્વનાથ જૈન શ્વે. મંદિર ટ્રસ્ટ-ભવાની પેઠ, પૂના.
(પ્રેરક : મુનિશ્રી અનંતબોધિવિજયજી મ.સા.)

૩૫ શ્રી કન્યાશાળા જૈન ઉપાશ્રય-ખંભાત
(પૂ. પ્રવર્તીની સાધ્વી શ્રી રંજનશ્રીજી મ.સા. તથા પ્રવર્તીની સાધ્વીશ્રી ઇન્દ્રશ્રીજી મ.સા. ના સંયમ જીવનની અનુમોદના અર્થે પૂ. સાધ્વીશ્રી વિનયપ્રભાશ્રીજી મ.સા. તથા પૂ. સાધ્વી શ્રી વસંતપ્રભાશ્રીજી મ.સા.)

૩૬ શ્રી જવાહરનગર જૈન શ્વે. મૂ. સંઘ-ગોરેગામ-મુંબઇ
(પૂ. પ્રશાંત મૂર્તિ આચાર્યદેવ શ્રી રાજેન્દ્રસૂરીશ્વરજી મ.સા. ની પ્રેરણાથી)

૩૭ શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ દાદર જૈન પૌષધ શાળા ટ્રસ્ટ
(પૂ. મુનિશ્રી અપરાજિતવિજયજી મ.સા. ની પ્રેરણાથી)

૩૮ શ્રી માટુંગા જૈન શ્વે. મૂ. તપાગચ્છ સંઘ એન્ડ ચેરિટીઝ-માટુંગા, મુંબઇ
(પૂ. પન્યાસપ્રવર શ્રી જયસુંદરવિજયજી ગણિવર્યની, પ્રેરણાથી)

૩૯ શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વે. મૂ. જૈન સંઘ
૬૦ ફૂટ રોડ, ઘાટકોપર (ઇ)
(પૂ. પં. શ્રી વરબોધિવિજયજી ગણિવર્યની પ્રેરણાથી)

❋ ❋ ❋ ❋ ❋ ❋ ❋ ❋



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## શ્રુતોદ્ધારક બનતા પુણ્યાત્માઓ તથા જૈન સંઘો.

૧ શ્રી લક્ષ્મીવર્ધક જૈન સંઘ, પાલડી, અમદાવાદ.
(પ. પૂ. મુનિરાજશ્રી નિપુણચંદ્ર વિજય મ.સા. ની પ્રેરણાથી)

૨ શ્રી નડીયાદ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નડીયાદ.
(પ. પૂ. મુનિશ્રી વરબોધિવિજયજી મ.સા. ની પ્રેરણાથી).

૩ શ્રી સાયન શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, સાયન, મુંબઇ.

૪ શ્રી પાર્શ્વનાથ શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ.
સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઇ.

❀ ❀ ❀ ❀ ❀ ❀ ❀

## શ્રુતભક્ત બનતા પુણ્યાત્માઓ તથા જૈન સંઘો.

૧ શ્રી બાબુભાઇ સી. જરીવાલા ટ્રસ્ટ, નિઝામપુરા, વડોદરા.

૨ શ્રી બાપુનગર શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
(પૂ. ગણિવર્યશ્રી અક્ષયબોધિવિજયજી મ.સા. તથા મુનિરાજશ્રી મહાબોધિવિજયજી મ.સા. ની પ્રેરણાથી)

૩ શ્રી સુમતિનાથ શ્વેતાંબર મૂર્તિપૂજક-જૈન સંઘ, મેમનગર, અમદાવાદ.
(પૂ. મુનિરાજશ્રી ધર્મરક્ષિત વિ.મ. તથા પૂ. મુનિરાજશ્રી હેમદર્શન વિ.મ.ની પ્રેરણાથી)

૪ સ્વ. શ્રી સુંદરલાલ દલપતભાઇ ઝવેરી
હા. જાસુદબેન, પુનમચંદભાઇ, જસવંતભાઇ વગેરે.

૫ શ્રી મુનિસુવ્રતસ્વામી જૈન શ્વેતાંબર મૂર્તિપૂજક મંદિર ટ્રસ્ટ, કોલ્હાપુર.

૬ શ્રી અરવિંદકુમાર કેશવલાલ ઝવેરી જૈન રિલિજીયસ ટ્રસ્ટ, ખંભાત.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## શ્રી જિનશાસન આરાધના ટ્રસ્ટ-મુંબઇ દ્વારા પ્રકાશિત થયેલા ગ્રંથોની સૂચિ

१) જીવવિચાર પ્રકરણ સટીક દંડક પ્રકરણ સટીક કાર્યસ્થિતિ સ્તોત્રાભિધાન સટીક.
२) ન્યાયસંગ્રહ સટીક.
३) ધર્મસંગ્રહ સટીક ભાગ-१.
४) ધર્મસંગ્રહ સટીક ભાગ-२.
५) ધર્મસંગ્રહ સટીક ભાગ-३.
६) જીવસમાસ ટીકાનુવાદ.
७) જંબુદ્વીપ સંગ્રહણી સટીક.
८) સ્યાદ્વાદમંજરી સાનુવાદ.
९) સંક્ષેપ સમરાદિત્ય કેવળી ચરિત્ર.
१०) બૃહત્ક્ષેત્રસમાસ સટીક.
११) બૃહત્ સંગ્રહણી સટીક.
१२) બૃહત્ સંગ્રહણી સટીક.
१३) ચેઇયવંદણ મહાભાસ.
१४) નયોપદેશ સટીક.
१५) પુષ્પમાળા (મૂળ અનુવાદ).
१६) મહાવીરચરિયં.
१७) મલ્લિનાથ ચરિત્ર.
१८) વાસુપૂજ્ય ચરિત્ર.
१९) શાંતસુધારસ સટીક.
२०) શ્રાદ્ધગુણ વિવરણ.
२१) તત્ત્વજ્ઞાન તરંગિણી.
२२) ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ ३/४.
२३) ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ ५/६.
२४) અષ્ટસહસ્રી તાત્પર્ય વિવરણ.
२५) મુક્તિપ્રબોધ.
२६) વિશેષણવતી વંદન પ્રતિક્રમણ અવચૂરી
२७) પ્રવ્રજ્યા વિધાન કુલક સટીક.
२८) ચૈત્યવંદન ભાષ્ય (સંઘાચાર ભાષ્ય સટીક).
२९) વર્ધમાન દેશના પદ્ય (ભા. १. છાયા સાથે).
३०) વર્ધમાન દેશના પદ્ય (ભા. २ છાયા સાથે).
३१) વ્યવહાર શુદ્ધિ પ્રકાશ.
३२) અનેકાન્ત વ્યવસ્થા પ્રકરણ.
३३) પયરણ સંદોહ.
३४) ઉત્પાદાદિસિદ્ધિ પ્રકરણ સટીક.
३५) અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-१ ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન.
३६) અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભા. २. ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન.
३७) પ્રશ્નોત્તર રત્નાકર (સેન પ્રશ્ન).
३८) સંબોધસપ્તતિ સટીક.
३९) પંચવસ્તુ સટીક.
४०) શ્રી જંબુસ્વામી ચરિત્ર.
४१) શ્રી સમ્યક્ત્વ સપ્તતિ સટીક.
४२) ગુરુ ગુણ ષટ્‌ત્રિંશત્ષટ્‌ત્રિંશિકા સટીક.
४३) સ્તોત્ર રત્નાકર.
४४) ઉપદેશ સપ્તતિ.
४५) ઉપદેશ રત્નાકર.
४६) શ્રી વિમલનાથ ચરિત્ર.
४७) સુબોધા સમાચારિ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૮) શાંતિનાથ ચરિત્ર ગ્રંથ.
૪૯) નવપદ પ્રકરણ સટીક ભા. ૧.
૫૦) નવપદ પ્રકરણ સટીક ભા. ૨
૫૧) નવપદ પ્રકરણ લઘુ વૃત્તિ.
૫૨) શ્રાદ્ધ પ્રકરણ વૃત્તિ.
૫૩) શ્રી પાર્શ્વનાથ ચરિત્ર.
૫૪) વિજય પ્રશસ્તિ ભાષ્ય (વિજય સેનસૂરિ ચરિત્ર).
૫૫) કુમારપાળ મહાકાવ્ય સટીક (પ્રાકૃત દ્વયાશ્રય)
૫૬) ધર્મરત્ન પ્રકરણ સટીક ભા. ૧.
૫૭) ધર્મરત્ન પ્રકરણ સટીક ભા. ૨.
૫૮) ઉપદેશ પદ ભા. ૧.
૫૯) ઉપદેશ પદ ભા. ૨.
૬૦) શ્રાદ્ધદિનકૃત્ય ભા. ૧.
૬૧) શ્રાદ્ધદિનકૃત્ય ભા. ૨.
૬૨) પાર્શ્વનાથ ચરિત્ર
૬૩) વિચાર રત્નાકર
૬૪) ઉપદેશ સપ્તતિકા
૬૫) દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ
૬૬) પુષ્પ પ્રકરણમાળા
૬૭) ગુર્વાવલી
૬૮) પુષ્પ પ્રકરણ
૬૯) નેમિનાથ મહાકાવ્ય
૭૦) પાંડવ ચરિત્ર ભા. ૧.
૭૧) પાંડવ ચરિત્ર ભા. ૨.
૭૨) પાર્શ્વનાથ ચરિત્ર ગદ્ય
૭૩) હીરપ્રશ્નોત્તરાણિ
૭૪) ધર્મવિધિ પ્રકરણ
૭૫) સુપાર્શ્વનાથ ચરિત્ર ભા. ૧.
૭૬) દેવધર્મ પરીક્ષાદિ ગ્રંથો.
૭૭) સુપાર્શ્વનાથ ચરિત્ર ભા. ૨/૩.
૭૮) પ્રકરણત્રયી
૭૯) સમતાશતક (સાનુવાદ)
૮૦) ઉપદેશમાળા-પુષ્પમાળા
૮૧) પૃથ્વીચંદ્ર ચરિત્ર
૮૨) ઉપદેશમાળા
૮૩) પાઇપ લચ્છી નામમાલા
૮૪) દોઢસો સવાસો ગાથાના સ્તવનો
૮૫) દ્વિવર્ણ રત્નમાલા
૮૬) શાલિભદ્ર ચરિત્ર
૮૭) અનંતનાથચરિત્ર પૂજાષ્ટક
૮૮) કર્મગ્રંથ અવચૂરી
૮૯) ઉપમિતિ ભવ પ્રપંચ કથા ભા. ૧.
૯૦) ધર્મબિન્દુ સટીક
૯૧) પ્રશમરતિ સટીક
૯૨) માર્ગણાદ્વાર વિવરણ
૯૩) કર્મસિદ્ધિ
૯૪) જંબુસ્વામી ચરિત્ર અનુવાદ
૯૫) ચૈત્યવંદન ભાષ્ય સાનુવાદ
૯૬) ગુણવર્મા ચરિત્ર સાનુવાદ
૯૭) સવાસો દોઢસો ગાથાના સ્તવનો
૯૮) દ્વાત્રિંશદ્દ્વાત્રિંશિકા
૯૯) કથાકોષ
૧૦૦) જૈન તીર્થ દર્શન
૧૦૧) જૈન કથા સંગ્રહ ભા. ૧.
૧૦૨) જૈન કથા સંગ્રહ ભા. ૨.
૧૦૩) જૈન કથા સંગ્રહ ભા. ૩.
૧૦૪) રયણસેહર નિવકહા.
૧૦૫) આરંભસિદ્ધિ સટીક
૧૦૬) નેમિનાથ ચરિત્ર ગદ્ય
૧૦૭) મોહોન્મુલમ્ (વાદસ્થાનમ્)
૧૦૮) શ્રી ભુવનભાનુકેવળી ચરિત્ર (અનુવાદ)
૧૦૯) શ્રી ચંદ્રપ્રભસ્વામી ચરિત્ર (અનુવાદ)
૧૧૦) આપણા જ્ઞાનમંદિરો



Jain Education International For Private & Personal Use Only www.jainelibrary.org

११) प्रमालक्षण
११२) आचार प्रदीप
११३) विविध प्रश्नोत्तर
११४) आचारोपदेश अनुवाद
११५) पट्टावली समुच्चय भा. १.
११६) पट्टावली समुच्चय भा. २.
११७) रत्नाकर अवतारिका अनुवाद भा. १.
११८) रत्नाकर अवतारिका अनुवाद भा. २.
११९) चैत्यवंदन चोवीसी तथा प्रश्नोत्तर चिंतामणी
१२०) निरयावलि सूत्र
१२१) कल्याण मंदिर-लघुशांति सटीक
१२२) उपदेश सप्ततिका (टीकानुवाद) पुस्तक
१२३) प्रतिक्रमण हेतु (पुस्तक)
१२४) जैन कुमारसंभव महाकाव्य
१२५) देवचंद्र स्तवनावलि
१२६) आनंदकाव्य महोदधि भा. १. (शालिभद्र-कुसुमश्री-रोहीणि प्रेमलावछी रास)
१२७) श्री पर्यंत आराधना सूत्र (अवचूरी अनुवाद साथे.)
१२८) जिनवाणी (तुलनात्मक दर्शन विचार)
१२९) प्रश्नोत्तर प्रदीप ग्रंथ
१३०) प्राचीन कोण श्वेताम्बर के दिगम्बर (गुजराती)
१३१) जंबूद्वीप समास (अनुवाद)
१३२) सुमति चरित्र (अनुवाद)
१३३) तत्त्वामृत (अनुवाद)
१३४) त्रिषष्ठिशलाका पुरुष चरित्र पर्व-२जु
१३५) त्रिषष्ठिशलाकापुरुष चरित्र पर्व-१लु
१३६) जैन कथा संग्रह भा. ४. प्रताकार संस्कृत
१३७) जैन कथा संग्रह भा. ५
१३८) जैन कथा संग्रह भा. ६
१३९) जैन धर्म भक्ति कंचनमाळा (सानुवाद) भा. १
१४०) जैन धर्म भक्ति कंचनमाळा (सानुवाद) भा. २
१४१) श्रीमोक्षपद सोपान (चौद गुणस्थानकनु स्वरूप)
१४२) रत्नशेखर रत्नवती कथा (पर्वतीथि माहात्म्य पर)
१४३) षष्ठिशतकम् (सानुवाद)
१४४) नमस्कार महामंत्र (निबंध)
१४५) जैन गोत्र संग्रह (प्राचीन जैन इतिहास सहित)
१४६) नयमार्गदर्शक याने सातनयनुं स्वरूप
१४७) महोपाध्यायश्री वीरविजयजी महाराजा चरित्र
१४८) मुक्ति मार्गदर्शन धर्मप्राप्तिना हेतुओ
१४९) चेतादूतम्
१५०) मूर्तिमंडन प्रश्नोत्तर
१५१) पिंडविशुद्धि अनुवाद
१५२) नंदिसूत्र (मूळ)
१५३) नंदिसूत्र सटीक (बीजी आवृत्ति)
१५४) नंदिसूत्र चूर्णि सटीक
१५५) अनुयोग द्वार सटीक
१५६) दशवैकालिक सटीक
१५७) दशवैकालिक दीपिका
१५८) ओघनिर्युक्ति सटीक



Jain Education International For Private & Personal Use Only www.jainelibrary.org

૧૫૯) પિંડનિર્યુક્તિ
૧૬૦) આવશ્યક સૂત્રની ટીકા ભા. ૧.
૧૬૧) આવશ્યક સૂત્રની ટીકા ભા. ૨.
૧૬૨) આવશ્યક સૂત્રની ટીકા ભા. ૩.
૧૬૩) આવશ્યક સૂત્રની ટીકા ભા. ૪.
૧૬૪) આવશ્યકસૂત્રની ટીકા ભા. ૧.
૧૬૫) આવશ્યકસૂત્રની ટીકા ભા. ૨.
૧૬૬) આવશ્યક સૂત્રની ટીકા ભા. ૩
૧૬૭) આવશ્યક સૂત્રની દીપિકા ભા. ૧.
૧૬૮) આવશ્યક સૂત્રની દીપિકા ભા. ૨.
૧૬૯) આવશ્યક સૂત્રની દીપિકા ભા. ૩.
૧૭૦) ઉત્તરાધ્યયન સટીક ભા. ૧
૧૭૧) ઉત્તરાધ્યયન સટીક ભા. ૨
૧૭૨) ઉત્તરાધ્યયન સટીક ભા. ૩
૧૭૩) જંબુદ્વીપ પ્રજ્ઞપ્તિ ભા. ૧
૧૭૪) જંબુદ્વીપ પ્રજ્ઞપ્તિ ભા. ૨
૧૭૫) જીવાજીવાભિગમ સૂત્ર ભા. ૧.
૧૭૬) જીવાજીવાભિગમ સૂત્ર ભા. ૨.
૧૭૭) રાજપ્રશ્નીય
૧૭૮) આચારાંગ દીપિકા -
૧૭૯) ભગવતી સૂત્ર ભા. ૧.
૧૮૦) ભગવતી સૂત્ર ભા. ૨.
૧૮૧) ભગવતી સૂત્ર ભા. ૩.
૧૮૨) પન્નવણા સૂત્ર સટીક ભા. ૧
૧૮૩) પન્નવણા સૂત્ર સટીક ભા. ૨
૧૮૪) ઋષિભાષિ સૂત્ર
૧૮૫) હરિભદ્રીય આવશ્યક ટીપ્પણક
૧૮૬) સૂર્યપ્રજ્ઞપ્તિ સટીક
૧૮૭) આચારાંગ દીપિકા ભા. ૧.
૧૮૮) સૂત્રકૃતાંગ દીપિકા ભા. ૨.
૧૮૯) ઠાણાંગ સટીક ભા. ૧.
૧૯૦) ઠાણાંગ સટીક ભા. ૨.
૧૯૧) અનુયોગદ્વાર મૂળ
૧૯૨) સમવાયાંગ સટીક
૧૯૩) આચારાંગ દીપિકા ભા. ૨.
૧૯૪) સૂત્રકૃતાંગ સટીક ભા. ૧
૧૯૫) સૂત્રકૃતાંગ સટીક ભા. ૨
૧૯૬) ભગવતી સૂત્ર
૧૯૭) કલ્પસૂત્ર પ્રદીપિકા
૧૯૮) કલ્પસૂત્ર કૌમુદિ
૧૯૯) આનંદ કાવ્ય મહોદધિ ભા. ૩.
ભરત બાહુબલી રાસ,
જયાનંદકેવળી રાસ, સુરસુંદરી રાસ,
વચ્છરાજદેવરાજ રાસ, નળદમયંતી
રાસ, હરિબળ માછી રાસ.
૨૦૦) શ્રી શ્રુતજ્ઞાન અમીધારા.
૨૦૧) ઉત્તરાધ્યયન સૂત્ર (મૂળ)
૨૦૨) ઉપધાન વિધિ-પૌષધ વિધિ
૨૦૩) હીરસ્વાધ્યાય ભા. ૧
૨૦૪) હીરસ્વાધ્યાય ભા. ૨
૨૦૫) ચૈત્યવંદનાદિ ભાષ્ય ત્રયં (વિવેચન)
૨૦૬) ભોજ પ્રબંધ (ભાષાંતર)
૨૦૭) શ્રી વસ્તુપાલ ચરિત્ર (ભાષાંતર)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम्

श्रीविजयधर्मसूरिभ्यो नमः ।

श्रीपद्मसागरगणिरचितं-

# जगद्गुरुकाव्यम् ।

नत्वा श्रीवलिजं जिनं जयकरं श्रीपार्श्वनाथं पुन-
ध्यत्वा श्रीत्रिपुरां त्रिलोकमहितां सद्बुद्धिसिद्धिश्रियम् ।
काव्यं वक्ति जगद्गुरोः शिशुरसौ भावाऽवनम्रस्त्रिधा
हीराङ्कस्मृति पद्मसागरकविः सौराष्ट्रराष्ट्रस्थितः ॥ १ ॥
जम्बूद्वीपभुवो विभूषणतरे क्षेत्रे वरे भारते
स्वर्णस्थालतलस्य दीपक इवोद्यन्मोदकक्षोदके ।
अस्ति स्वस्तिगृहं द्विषोडशसहस्रोद्दामदेशोल्वणं
खण्डं मध्यममुत्तमैर्नरवरैर्भोज्यं सदाज्याश्रवत् ॥ २ ॥
देशस्तत्र च गूर्जरोऽजरजनः स्ववत् सुवर्णान्वितो
गीर्वाणाऽचलवद् गुणादरकरः कामं धनुर्द्धारिवत् ।
साध्वीसाधुविशेषसंयमसुखः सद्वृच्छवच्छ्रीयुतः
शश्वत् केशववद्विचित्ररचनः शृङ्गारवद्राजते ॥ ३ ॥
श्रीप्रह्लादननामकं पुरवरं तत्राऽस्ति यत्रैधते
श्रीप्रह्लादनपार्श्वनाथसदनं चक्रेशसैन्यं यथा ।
सद्रत्नाऽक्षतपूरपूर्णनिधिकं चित्राङ्गमातङ्गजो-
दाराश्वं च पुरोहिताङ्कसचिवं वीराधिवीराश्रितम् ॥ ४ ॥
कुंरस्तत्र वणिक्कलासु निपुणः सम्यक्त्वपूतोऽभव-
दोकेशान्वयभूषणं धनवतां मध्ये प्रतिष्ठां गतः ।
जिग्ये येन सितोदरः पटुधनैर्वर्गत्रयीसाधनै-
र्नो चेदेष ततः कथं नरपुरे नामाऽवशिष्टोऽधुना ? ॥ ५ ॥
नाथी तस्य पतिव्रता कुलवधूर्धर्मोदिता सुन्दरी
गेहं भूषयतीव कल्पलतिका मेरुं सुपर्वोत्सवम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्याः शीलगुणेन नागरजनैः सीता स्मृतिं प्रापिता
शृङ्गारैः कमला धिया भगवती रूपेण कामाङ्गना ॥ ६ ॥
सा सौख्यं विषयोत्थितं निजपतिप्रत्तं मयूरी यथा
वार्वाहार्पितमम्बु शोकरहिताऽप्यास्वादयन्ती सती ।
सिंहस्वप्नमवाप्य पुत्रमनघं गर्भेऽवतीर्णं निजे
मेने पूरितदोहदेहितफलप्राप्तेः स्वभर्तुर्गिरा ॥ ७ ॥
साऽसूतान्यदिने सुतं दिनकरं पूर्वेव तेजस्विनं
हंसी हंसमिवेन्दिरेव मदनं स्कन्दं पुनः पार्वती ।
यज्जन्मन्यभवन् प्रसन्नवदनाः काष्ठा गृहान्तःस्थिता-
दीपाः कान्तिविलोपकार्मकमया मन्दाः पतद्वृत्तयः ॥ ८ ॥
वप्रा तत्र ददर्श बालमनघं विष्णो यथा देवराट्
जातं तीर्थकरं सुलक्षणतया चक्रे विचारं त्विमम् ।
दुष्टैस्तावदभेद्य एष भविता हीरो यथाऽमूल्यक-
स्तद्धीरेत्यभिधानमस्त्विति कुटुम्बाग्रेऽवदन्मोदतः ॥ ९ ॥
हीरः कुंरगृहाङ्गणेऽथ ववृधे कल्पद्रुमस्ताविषे
विन्ध्याद्राविव कुञ्जरो मणिगणः श्रीरोहणे पर्वते ।
चन्द्रः पक्ष इवाऽमले च कमले कोशः शुचावम्बुदः
कन्दोऽम्भोधितले प्रवालज इवाऽर्हद्धाम्नि धर्मक्रमः ॥ १० ॥
हीरोऽध्यापकहृद्गतानि सकलान्यादत्तवान् बुद्धितः
कुंरस्तस्य ददौ च काञ्चनचयं हीराङ्गभारप्रमम् ।
विद्याप्राप्तिरिह त्रिधा हि विनयैरर्थैः पुनर्विद्यया
जानन्नीतिमिमां विचारचतुरः सर्वोचितार्थप्रदः ॥ ११ ॥
हीरो द्वादशवार्षिकोऽभवदथ स्पष्टैर्गुणैर्दक्षतौ-
दार्याद्यैर्गुणवत्सु भारतभुवि प्राप्तैकरेखः परम् ।
लोकानां नयनेषु रूपकमलारेखा अनेका ददौ
बुद्ध्यानन्त्यमशेषरोचकतया चित्तेषु चाश्चर्यतः ॥ १२ ॥
अन्येद्युर्नगरान्निजात् स्वभगिनीगेहे समाजग्मिवान्
श्रीमद्गूर्जरपत्तने कविजनैः स्वःखण्डताख्यापिते ।
हीरस्तत्र मुनीश्वरान् विजयतो दानाऽभिधानान् मुदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्तः साधुगृहस्थितांस्तपगणस्वामित्वमाप्तान् स्फुटम् ॥ १३ ॥
तेषां वाचमनेकवाङ्मयरसक्लिन्नां विरक्तात्मनां
वैराग्याऽमृतवार्द्धिनीं श्रुतिपुटद्वारा हृदि न्यस्तवान् ।
हीरो हीरकवद्भवाऽधिकरणैर्लोहैरभेद्यस्ततः
शुद्धाचारतपोग्रहोद्यतमतिर्जातः सुजाताङ्गवत् ॥ १४ ॥
वैराग्यं भवरङ्करूक्षहृदयादाविष्चकार स्वसु-
र्गत्वा धाम्नि पुरस्तथाविधवचःश्रेण्याऽतिपुण्यास्थया ।
मृत्खण्डादिव काञ्चनं रचनया स्वर्णधमः शुद्धया
भूमध्यादिव वा जलं खननकृच्छक्त्या करप्राप्तया ॥ १५ ॥
तं दीक्षापरमानसं स्वसृवरा ज्ञात्वा कुटुम्बं निजं
तत्राकार्य पितुः पुरोऽवददिदं मुक्ताश्रुभूभेदिनी ।
भ्राता मे भवभीरुरेष भवतां पुत्रस्तपस्याग्रही
वार्यो वर्यधिया कुलाचल इवास्त्येको भवन्मन्दिरे ॥ १६ ॥
पुत्रीवाक्यमिदं निशम्य जनकः स्माख्याति हीरं सुतं
वत्स ! त्वं मम जीवनं मम गृहस्तम्भः समर्थः पुनः ।
आशा ते महती ममास्ति मम तद्वृद्धस्थितिं पालय
त्वं मद्गेहधुरं वहाऽहमधुना धर्मं करोमि स्थिरः ॥ १७ ॥
श्रुत्वा वाक्यमिदं पितुः समवदद्धीरः पवित्राशयः
संसारो यमवन्ममाऽतिभयकृद्भातः पितः ! सांप्रतम् ।
तत्त्वं तारय संसृतेः सुजनको यत् सौख्यदः सन्तते-
श्चारित्रग्रहणे ममास्तु भवतां वंशस्य चास्तूदयः ॥ १८ ॥
वाग्युक्त्या पितरं प्रबोध्य भगिनीं वा मातरं शुद्धया
तैर्दत्ताऽनुमतिर्व्रतं स जगृहे पौरैः कृतात्युत्सवम् ।
बाले प्रव्रजति प्रधानधनभुक् त्यक्त्वा कुटुम्बं निजं
धन्यंमन्यतयाऽत्र को न कुरुते श्राद्धो निजर्द्धिव्ययम् ॥ १९ ॥
हर्षस्तत्र बभूव हीरकमणिप्राप्त्येव हीरादतः
साधूनां व्यवहारिणामिति गुरुः श्रीहीरहर्षाभिधाम् ।
चक्रे वर्गविलोकनादपि निजाह्वाद्यक्षरप्रीतितः
सन्तोऽन्वर्थकनाम यद्विदधति प्राज्ञे विनेये सुते ॥ २० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धृत्वा पञ्चमहाव्रतानि समितिप्रोद्दामगुप्त्यङ्किता-
न्येष प्रोद्धृतमेरुमानवमहीसाम्यं क्षमातोऽभजत् ।
साधूनां विविधैर्गुणैर्धुरि तपःकृत्येऽभवद्धौर्यवत्
शाकट्येऽध्ययने च देवगुरुवद्दर्भाग्रबुद्धिर्मुनिः ॥ २१ ॥
विद्यासागरवाचकस्य गुणिभिः शिष्यैर्वयोधीसमैः
सार्द्धं सद्व्रतिधर्मसागरवरैः श्रीमद्गुरोरग्रतः ।
सम्यग् व्याकरणं कवित्वरचनाग्रन्थांस्तथाऽर्हन्मत-
न्यायं कर्मविचारसंग्रहणिकां स्माध्येति हीरो मुनिः ॥२२॥
सर्वार्हन्मतशास्त्रपारमगमच्छ्रीहीरहर्षो मुनि-
र्जातोऽन्यागमदर्शनोत्सुकमनाः श्रीमद्गुरोर्नीतिवित् ।
सार्द्धं धर्ममुनीश्वरैरिति गिरा विज्ञप्तिकामाततोत्
स्वामिन् ! मे परशासनागमवचोयुक्तिप्रकाशे ममः ॥ २३ ॥
श्रुत्वेत्याह गुरुस्ततो व्रज मुने ! श्रीदक्षिणाशां प्रति
योग्यं धर्ममुनिं सहायमधुनैवादाय रामो यथा ।
श्रीमल्लक्ष्मणमन्यशास्त्रपठनं तत्रान्यपार्श्वे कुरु
स्पष्टाः स्वागमयुक्तयो हि धनिनां तत्रैव तद्वादिनः ॥ २४ ॥
लब्ध्वाज्ञामिति सद्गुरोः कविवरः श्रीहीरहर्षो मुनिः
सार्द्धं धर्ममुनीश्वरेण चलितः श्रीदक्षिणाशां प्रति ।
गत्वा देवगिरौ सदाऽऽस्तिककृतद्रव्यव्ययाद्धृतो
मण्याद्यागमयुक्तिपाठमनघं प्रारब्धवानादृतः ॥ २५ ॥
ग्रन्था न्यायविदां विवेचनकृतां वैशेषिकाणां पुन-
र्भाट्टस्याऽपि तथागतस्य कपिलप्राभाकराणां पुनः ।
मीमांसाद्वयवादिनामपि परब्रह्माद्वयोत्संविदां
भट्टात्पण्डितचक्रिणोऽत्र पठिताः श्रीहीरहर्षेण ते ॥ २६ ॥
सार्द्धं धर्ममुनीश्वरेण सकलग्रन्थार्थपारङ्गमी
भूत्वा श्रीगुरुसन्निधौ पुनरगात्तत्स्तोत्रपाठे पटुः ।
शिष्याणां हि गुणार्थिनां चिरतरं दूरे गुरोर्न स्थितिः
सिद्धेऽर्थे तु गुरुर्न शिष्यमनघं दूरे व्यवस्थापयेत् ॥ २७ ॥
योग्यत्वं गुरुरेतयोर्निजधिया विज्ञाय शास्त्रश्रियो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चक्रे वाचकसंज्ञितं पदमुदारानेकसभ्याग्रहात् ।
शिष्यं योग्यमवाप्य चेन्न पदवीमारोपयेद्यो गुरुः
स स्यात्प्राज्यभवभ्रमी निजगुणध्वंसी गुणोपेक्षणात् ॥ २८ ॥
गच्छैश्वर्यमथ प्रदातुमनयोर्मध्ये विशेषं गुरु-
र्जिज्ञासुर्जिनशासनामरमसावाराधयत् साधनात् ।
मन्त्रस्योत्तमगच्छनाथजपनार्हस्याघविध्वंसिनः
षण्मासीतपसा विमुक्तवचनव्यापारदीप्तिस्पृशा ॥ २९ ॥
ध्यानाकृष्टतया ततोऽमरवरः सद्यः समाजग्मिवा-
न्नत्वा पादपयोरुहं गणपतेराख्यद्विशिष्टं गुणैः ।
श्रीहीरं गुरुपङ्क्तिभूषणकरं राजप्रबोधोदितं
व्यक्तं भाविनमत्र सूरिपदवीयोग्ये तपाख्ये गणे ॥ ३० ॥
दैवं वाक्यमिदं निशम्य मुमुदे श्रीमत्तपागच्छराट्
मोदः कस्य भवेन्न यत् स्वपदवीयोग्ये सुशिष्ये श्रुते ।
मुक्त्वा ध्यानमथागमज्जिजयतिश्राद्धौघपर्षद्यह-
र्वक्त्रे भानुरिवोदयाऽद्रिशिरसि प्रोल्लासितेजःस्थितिः ॥ ३१ ॥
सङ्घाग्रे सुरवाक्यमेतदभवच्छ्रीमद्गुरूर्गौरवात्
सङ्घो यज्जिनसंमतो गुरुतरैर्नोपेक्ष्यते बुद्धिमान् ।
कृत्वा सङ्घमतं न्यवेशयदसौ श्रीहीरहर्षं निजे
पट्टेऽर्हन्मतसारसूरिपदवीयोग्ये मुहूर्त्ते सुधीः ॥ ३२ ॥
सीरोहीनगरे बभूव विजयो हीरादतस्तद्गुरु-
र्नामास्याशु चकार हीरविजयं सद्भिस्तदा स्वीकृतम् ।
इभ्यैः सूरिपदोत्सवस्तु विविधश्चक्रे तथेन्द्रैर्यथा
श्रीवीरेण सुधर्मगौतमशिरःपट्टप्रदानक्षणे ॥ ३३ ॥
आचार्यैः सममेतके गुरुवरादेशात्ततः प्रस्थिता-
आयाता अणहिल्लपत्तनपुरे तस्थुश्चतुर्मासकम् ।
पोता अम्बुनिधाविवोडुपभरैर्नीडे यथा पक्षिणः
स्वापत्यैर्मुनिचक्रसेवितपदाः संसारलेपोज्झिताः ॥ ३४ ॥
गूढाम्नायजिनोक्तवाङ्मयरसं श्रीहीरकोष्ठे गुरु-
र्व्याघ्रीदुग्धमिव प्रकृष्टकनकामत्रेऽनिशं क्षिप्तवान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लब्धे शिष्यवरे हि यः शुचितमां दत्ते न विद्यां निजां
निर्विघ्नः स भवे परत्र भविता धिक्कारमेत्यत्र च ॥ ३५ ॥
शुद्धांशे सकलग्रहेषु पदवीमुच्चाङ्कतेषूत्तमे
लग्ने श्रीगुरुभूपतिर्विधिधरः श्रीसूरिमन्त्रं ददौ ।
लक्षेभ्यैर्विहितेऽत्र हीरविजयाचार्याय कोटिव्यये
हीरार्थं कुरुते न किं धनिजनः कोटिव्ययं बुद्धिमान् ? ॥३६॥
निश्चिन्ता गुरवः स्वपट्टविवधारोपात् स्वशिष्येऽधिके
श्रीहीरे निजकार्यसाधनपरा व्यापारमासूत्रितम् ।
गच्छस्यास्य विमुच्य संयमसुखे मग्ना रसे शान्तिके
जग्मुर्देवगृहं विशुद्धमनसोऽर्हद्ध्यानलीनास्ततः ॥ ३७ ॥
गच्छेऽस्मिन्नथ चारुहीरविजया भट्टारकत्वं गता-
निर्ग्रन्थान् द्विसहस्रमानगणितान् संशिक्षयन्त्यादृताः ।
वाक्यैर्हृद्युचितैर्मितैर्हितकरैर्जैनैरिवाकर्कशै-
श्चारित्रोपकृतिप्रदानविधिना सन्तोषयन्ति क्रमात् ॥ ३८ ॥
देशे यत्र पुरेषु येषु विहृतिं चक्रुस्त्विमे सूरयः
सप्तक्षेत्रधनव्ययो धनिकृतस्तत्राऽभवत्तेषु वा ।
जीवाऽमारिरहर्निशं प्रतकृतिर्दीनोद्धृतिर्भाविनां
प्रासादोद्धरणं च भक्तिकरणं साधर्मिकाणां पुनः ॥ ३९ ॥
अन्येद्युर्भुवि सूरिहीरविजया गन्धारपुर्यां स्थिताः
कृत्वाऽवग्रहमब्धिमासनियतं साधुव्रजभ्राजिताः ।
दिल्लीशेन यथा श्रुताः कृतिनरैराकारिताः सत्कृता-
जीवामारणवर्त्तनैरिति तथा सर्वं मया प्रोच्यते ॥ ४० ॥
अस्ति श्रीमति भारतक्षितितले श्रीमध्यदेशः शुचि-
प्रासादप्रतिमासुपुस्तकनिधिर्वर्यार्यलोकाश्रितः ।
देशाः सार्द्धकपञ्चविंशतिमिताः सन्त्येव यत्र स्फुर-
च्चक्रिश्रीजिनविष्णुमुख्यपुरुषश्रेष्ठाऽवतारोदिताः ॥ ४१ ॥
अस्त्यत्र प्रवरा पुरी नरभरैरापूरिता काबिला-
भिख्या सत्खुरसानदेशनिकटे वीराधिवासोचिता ।
यस्यां मुद्गलक्षमक्षतबलं हिन्द्वासुरत्रासकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वैरं द्रव्यशतानि सार्द्धघटिकामध्येऽत्ति भोगैर्घनैः ॥ ४२ ॥
आसीत्तत्र हमाउनामनृपतिर्दैत्यावतारोऽरिषु
म्लेच्छानामाधिपः प्रतापतपनश्चक्रीव युद्धे जयी ।
यस्याश्वा इव राक्षसा गिरिशिरःस्फालाः प्रलम्बानना-
स्त्रासं हस्तिवरानपीव महिषाग्निर्यं नयन्ति क्षणात् ॥ ४३ ॥
अन्येद्युः स सुतेऽष्टवर्षवयसि स्पष्टोदयेऽकब्बरा-
भिख्ये राज्यभरं निवेश्य चलितः कर्तुं महीमात्मसात् ।
अभ्यन्तां प्रलयाब्धिसैन्यकलितस्तावत् समेतः पुरे
दिल्लीनाम्नि भटालिदुर्घटतटे कोटीश्वराभ्याश्रिते ॥ ४४ ॥
तत्राभून्नवलक्षवाजिसुभटः सूरः प्रतिष्ठानपो
मत्तेभाद्विचतुःसहस्रगुणनः कोटघुमपत्तीश्वरः ।
युद्धे येन च राष्ट्रकूटकुलभूः श्रीमल्लदेवो जितः
श्रीमद्योधपुरेश्वरो मरुपतिदुर्वारवीरावृतः ॥ ४५ ॥
तस्मै सूरनरेश्वराय निपुणं दूतं तदा प्राहिणो-
च्छ्रीमन्मुद्गलनायकः परिसरे स्थित्वा सुनीतिं वहन् ।
दूतोऽप्याऽऽख्यदिदं हमाउनृपतेः पादप्रणामं कुरु
श्रीदिल्लीश ! भवाहवाय सुतरां सज्जोऽथवेतो व्रज ॥ ४६ ॥
श्रुत्वा दूतवचोऽवदन्नरपतिः सूरोऽतिगर्वोद्धुरः
कोऽयं मत्पुरतो हमाउनृपतिर्वाणिज्यकृद्दुम्भ्रमी ।
दत्त्वाऽश्वांश्चिरसञ्चितान्मणिगणान् स्वर्णं च रूप्यं वशा
वीराणां च शिरांसि यास्यति वपुःशेषः सुशेषीभवन् ॥४७॥
याहि त्वं वद दूत ! मद्वच इदं तस्मै निजस्वामिने
भूयाः सज्ज इहाहवेऽहमनुगस्तेऽभ्यागतः सांप्रतम् ।
इत्युक्त्वा गलहस्तदानमकरोद्दूतस्य सूरो नृपः
कोपो यत्स्वविनाशकारिसमये दुष्टं विधिं कारयेत् ॥४८॥
दूतस्तद्वचनं स्वलाघवकृतिं स्माख्याति तन्मत्तताां
श्रुत्वा काबिलनायकोऽपि हृदयेऽप्युल्लासमुच्चैर्दधौ ।
नो भीतिं निजबाणवीर्यचकितं जानन्नदृश्यं हरिं
किं पर्जन्यविगर्जनश्रवणतो बिभ्येति पाथःपतिः ? ॥४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ढक्कावादनपूर्वकं नरपतिः सूरोऽपि सैन्यं निजं
सन्नद्धं विविधाऽस्त्रपङ्क्तिकिरणैर्लुप्तोष्णपादांशुकम् ।
एकीकृत्य चचाल मुद्गलपतेः सैन्यं तृणप्रायकं
जानन् मत्तमतङ्गजावलिरणद्धण्टारवाडम्बरः ॥ ५० ॥
सङ्ग्रामाङ्गणमागतं क्षितिपतिं दृष्ट्वा हुमाऊन्नृप-
स्तं वीरान् द्विसहस्रमानगणितान् युद्धार्थमाज्ञापयत् ।
प्राज्यान् यत्तृणपूल्कान् शिखिकणा द्वित्रा न किं भस्मय-
न्त्येवं चेतसि चिन्तयन्निजबलस्कन्धे स्थितः सोद्यमः ॥ ५१ ॥
तावद्भिः सुभटैर्घनैरिव भृशं बाणाम्बुधारोच्चयान्
वर्षद्भिर्नवलक्षसैन्यमसमं चक्रे विवल्याकुलम् ।
द्वित्राः किं न मृगारिमत्तशिशवः कोटीभदर्पापहा-
द्वित्रा वामृतबिन्दवः पृथुतराऽसाध्यैकरोगापहाः ॥५२॥
तैः सैन्यं निजमाकुलं कृतमिदं वीक्ष्याशु सूरो नृपः
सङ्ग्रामाभिमुखोऽभवद्गजघटाध्यास्फालितारिव्रजः ।
निघ्नन् बाणगणैरलक्ष्यचरितैः कान्ताकटाक्षैरिव
त्यक्तास्त्रं द्विसहस्रमानगणितं सैन्यं चकारानुगम् ॥५३॥
सैन्ये तावति शस्त्रदर्परहिते पश्चात् समागच्छति
द्विट्चक्रे जयतीह सूरनृपतिश्चेत्युद्धतं गर्जति ।
श्रीमन्मुद्गलनायकोऽपि सुभटैर्लक्षप्रमैरुत्थितः
किं शेषः स्वफणावृतः क्षितितलादागादरिग्रासकृत् ? ॥ ५४ ॥
श्रीसूरोऽपि हुमाउरप्यभिमुखं वीरैर्निजैर्वेष्टितौ
कुर्वाणाविव युद्धमुद्धतमिमावादित्यराहू क्षितौ ।
किं व्योम्नः पतितौ पुनः पुनरिवोत्प्लुत्यान्तरिक्षाशया-
यातोऽप्यूर्द्ध्वमितीह साधु कुरुतस्तर्कं सतां मानसे ॥ ५५ ॥
तावत्काबिलनायकः करतले धृत्वा धनुर्दोष्मतां
मुख्यः सूरबले ललाटतिलकं केषां विभिन्नं पुनः ।
केषाञ्चिद् हृदयं चकार जठरं मूत्रप्रदेशं पुनः
केषाञ्चित्करयामलं करयुगं केषाञ्चिदस्त्रव्रजम् ॥ ५६ ॥
बाणासारमिति प्रवर्षति नृपे तस्मिन् स्वयं तद्भटे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्वेवं वर्षदनेकशस्त्रनिकरेष्वेकोऽपि कश्चिद्बले ।
सौरेऽभून्न भटः पटुः स्फुटकर्णैर्यो जर्जरश्चेषुभि-
स्तत्किं ध्वान्तमिहाऽस्ति यद्रविकरैर्नो भिद्यतेऽत्युज्ज्वलैः?॥५७॥

भग्नं सौरबलं विमुच्य सकलं वित्तं गजाश्वादिकं
नष्टं दिक्षु विदिक्षु निःस्वतुषवत्फूत्कारसाध्यं गतम् ।
देशं तस्य विभुत्वमश्वनिकरं स्वर्णं मणीन् हस्तिनः
कोशं वा जगृहे हमाउसुभटश्रेणिः स्वनाथाज्ञया ॥ ५८ ॥

नष्टे सूरनृपे तदीयसुभटान् कृत्वा स्वसेवापरान्
निर्दण्डान् सुखिनश्च देश्यमनुजान्निर्भीतिराज्यं दधौ ।
दिल्लीकाबिलमार्गसञ्चरदिभाश्वोक्षोष्ट्रमानुष्यकं
मुक्तारत्नसुवर्णराशिरचितोत्तुङ्गाद्रिकोट्यालयम् ॥ ५९ ॥

किं चाऽस्मिन् समये विशिष्टमनुजे श्रीगूर्जरे मण्डले
भूभुग् बादरसंज्ञितः करिबलः षड्लक्षसैन्योद्धुरः ।
सामुद्रानपि भूपतीन्निजपदाम्भोजन्मसेवोद्यतान्
कुर्वन्मालवदाक्षिणात्तमपतिश्रेण्यर्चितश्चाभवत् ॥ ६० ॥

अन्येद्युः स च मेदपाटधनिकं श्रीरत्नसिंहं रणे
जित्वा तन्नगरं बभञ्ज हठतः श्रीचित्रकूटाभिधम् ।
तत्र क्षत्रियपुत्रिकाततिरभूद्वह्निप्रवेशाद्गत-
प्राणाश्चापरमानवा भटचयव्यापारितास्त्रात्तथा ॥ ६१ ॥

तद्दुःखादसमाधिवासितहृदा श्रीरत्नसिंहक्ष्मा-
पालेनेति हमाउभूमिपतये विज्ञप्तिराविष्कृता ।
साहाय्यं कुरु मे तथा नरपते ! दुष्टं यथाऽन्यायिनं
बध्वा बादरनामकं करतले देहि क्षमस्त्वं यतः ॥ ६२ ॥

तस्याभ्यर्थनयेति काबिलपतिः सैन्यावृतो बादर-
क्षोणीशग्रहणाय बद्धकवचः सद्यश्चचालोद्धतः ।
दिल्लीतस्तृणवच्च गूर्जरभटांश्चित्ते निजे कल्पयन्
दोर्वीर्यं निजमाप्तवद्धरिहरब्रह्मादिवीर्याधिकम् ॥ ६३ ॥

यावच्छ्रीमति चित्रकूटनिकटे दिल्लीपतिश्चागत-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तावद्बादरभूपतिर्निजबलाविष्टः प्रनष्टस्तदा ।
गत्वा मालवमण्डलेऽतिगहने कोट्टं दृढं मण्डपा-
भिख्यं सज्जयति स्म सज्जविभवस्तत् स्पष्टयुद्धासहः ॥ ६४ ॥

तं नष्टं स निशम्य मालवपथे व्यक्ताभिमानोऽचल-
दूरे मालवको यमस्य किमयं दृष्टान्त इत्येष यत् ।
रुद्धा मण्डपकोट्टमुद्भटभटैर्जम्ब्वाख्यमब्धिर्यथा
द्वीपं दुर्द्धरवीचिभिः स्थितिमसौ दिल्लीपतिर्निर्ममे ॥ ६५ ॥

भग्नः स्तोकदिनैर्गजैर्भटघटानुन्नैः स वप्रो दृढो-
ऽपीवाद्रिः कुलिशानलैर्हरिकराध्यास्फालनोत्थैस्ततः ।
नष्टस्तुच्छभटः प्रकम्पहृदयः स्पष्टं गतो गौर्जरे
पावाद्रौ विविधर्द्धिभूषितगृहे स्वर्गावतारेऽधिकम् ॥ ६६ ॥

लात्वा मण्डपपर्वतं धनरथाश्वेभैश्च मर्त्यैर्भृतं
कोटीशैः स्वविलासधिक्कृतनराधीशैरुदारात्मभिः ।
आज्ञां मालवमण्डले निजभटैर्सार्द्धं समारोपय–
द्वास्यां कल्पलतामिवोत्तमफलामारामिकः सिद्धिवित् ॥ ६७ ॥

पावाद्रौ विहितस्थितिं निजचरैर्मत्वा पुनर्बादरं
दिल्लीशः स्वभटावृतोऽत्र गतवान् सद्यः प्रयाणैः सुधीः ।
कर्तुं यद्विबुधैः समस्तपुरुषाध्यक्षं मुखे भाषितं
तत्कार्यं न समाप्तिमेति सुधियां यावन्न तावत् स्थितिः ॥ ६८ ॥

श्रुत्वा काबिलनायकागममसौ नष्टस्ततो बादरो–
यो यस्माच्चकितो हि तस्य पुरतस्तस्यैवमेवं गतिः ।
श्रीमत्स्तम्भनपार्श्वनाथविशदे श्रीस्तम्भतीर्थे गतः
सद्धर्मादिकवर्गसाधकजनाकीर्णे धनाध्यासिते ॥ ६९ ॥

ज्ञात्वा तत्र गतं चरैश्च चलितः सद्यो हमाउस्ततः
सन्ध्यायां स तथा यथागमदिह प्रातर्भटावेष्टितः ।
अब्धेर्भानुरिवांशुपूरकलितः खेऽन्यायिघूकक्षयी
तेजस्वी नयतः करोति हृदये शङ्कां व्रजन् सर्वतः ॥ ७० ॥

रत्नस्वर्णभृतान्यनेकशकटान्यब्धेस्तटे बादर–

त्यक्त्वा तुच्छभटावृतोऽम्बुधितरद्द्वीपेऽविशङ्ककवत् ।
वीर्यान्तस्तु हमाउनामनृपतिर्भूभुग् गृहान्तर्यथा
हस्ती गन्धवरः स्ववैरिसदहृत्प्राप्तप्रतिष्ठोऽभितः ॥ ७१ ॥

मत्वा नष्टसमस्तसंपदमसौ जीवन्मृतं बादरं
तद्बन्धाग्रहमामुमोच हृदये दिल्लीपतिः शक्तिमान् ।
यद्वायुर्न तृणानि नीचनमनानुन्मूलयत्युद्धतः
सद्यो वृक्षचयं समुच्छ्रुततरं विस्तीर्णभूच्छायकम् ॥ ७२ ॥

तत्राज्ञां स्वभटैः समं कृतिकरः श्रीगुर्जरे मण्डले
दिल्लीशः स समग्रभूमिवलये कीर्त्तिं यथाऽरोपयत् ।
खड्गं क्षालयति स्म नीरधिजले तीर्थे यथा निर्मलः
प्राणी प्राप्य निजं सुपात्रततये सद्वस्तुदानोद्यतः ॥ ७३ ॥

कृत्वा गुर्जरमालवादिकमहादेशेषु साम्राज्यं पुन-
र्दिल्ल्यां मुद्गलनायकः शतगुणश्रीवृद्धिमान्नागतः ।
एकच्छत्रमकण्टकं सुखभरं राज्यं बभाषोत्तरं
पुण्ये जाग्रति को न वाञ्छिततत्तिं प्राप्नोति यस्माज्जनः ॥ ७४ ॥

अन्येद्युः स सुपर्वपर्वतसमप्रोच्चालयोर्द्धं गतः
पश्यन् स्वं नगरं विशालनयनः प्रोत्फुल्लचित्ताम्बुजः ।
मत्तुल्योऽवममूदितीव विधिना स्पर्द्धिष्णुना पातितः
संप्राप्तभ्रमिराशु कालसदनं प्राप्तः पृथिव्यां पतन् ॥ ७५ ॥

धिग् धिग् धिग् विधिमेनमङ्गिनिवहं कृत्वा जगत्स्वामिनं
गर्त्ताधूलिशयं करोति सहसा यः सज्जनो दुर्जनः ।
एवं सर्वजना विलापमतुलं चक्रुस्तदा तत्पुरे
सूर्येऽस्तंव्रजतीह को न विवशः शोके न चान्धो भवेत् ॥ ७६ ॥

खद्योता इव तत्र सूरसुभटा अस्तङ्गते भास्करे
तस्मिन् कालगृहं गते गतभयास्तत्पुत्रमग्रेसरम् ।
कृत्वा दुर्वहशस्त्रपाणिपटवो निर्नायकान् मुद्गला-
नागत्य स्म वितर्जयन्ति हि जयो निर्नायकानां कुतः ॥ ७७ ॥

ते संभूय ततः स्वकाबिलपुरीमुद्दिश्य तत्तर्जिता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेशुश्चारकसंस्थितो नरभरः प्राप्नोति यद्वारकम् ।
यावत्तावदकब्बरो लघुवया अप्युग्रतेजःस्फुर–
न्नश्रौषीत् स्वपितुर्मृतिं निजभटत्रासं च दस्यूदयम् ॥ ७८ ॥

शोकं स क्षणमात्रमात्मकुलजैः कृत्वा समं काबिला–
पुर्याः पञ्चशतीभटैः परिवृतः सद्यः समाजग्मिवान् ।
स्वं बन्धुं च निवेश्य तत्र नगरे शिक्षाविधानोद्यतं
तेजो यत् सहते न वैरिकुलजं वीराधिवीरः परम् ॥ ७९ ॥

श्रीमल्लाहुरनाम्न्यऽपूर्वनगरे सैन्याय तत्रासतो–
ऽत्रायाताय नरेश्वरोऽमिलदिवाऽकाण्डेऽभिमन्युक्षये ।
पार्थो धिक्कृतिकारकः कथमहो नश्यद्भिरत्रागतं
श्रीमद्भिर्न मृतं निहत्य सकलान् सौरान् भटानित्यवक् ॥ ८० ॥

ते ऽप्यूचुः सुभटास्त्वदक्षियुगलस्याग्रे वयं तान् ध्रुवं
हन्तुं सज्जकरा रवेरिव तमांस्येषोऽरुणो नान्यथा ।
एवं तान् वदतो वचः कुशलतावेदी भृशं सत्कृतां–
श्चक्रेऽकब्बरभूपतिर्निजबलाऽवज्ञातदैत्याधिपः ॥ ८१ ॥

तत्र द्वादशवार्षिकोऽपि नृपतिस्तत्सैन्यवीरावृतः
सौरे सैन्यभरे समापतदिवागस्तिः सरित्नायके ।
चित्रं तद्भटशोषमेष विदधे स्वाह्वाक्षरश्रावणात्
स्वं सैन्यामृतवारिधिं जयरसापूर्णं पुनर्निर्ममे ॥ ८२ ॥

भग्नं सौरबलं गतं यमगृहे किञ्चिद्गिरेर्गह्वरे
किञ्चिद्वारिनिधौ वनेऽतिगहने किञ्चिन्न किञ्चित्करम् ।
जातं वीक्ष्य पुनर्निजं नरपतिर्लब्धर्द्धिहस्त्यश्वकं
प्रत्येकं स्वभटेषु चक्रितुलनां मेने जयावाप्तितः ॥ ८३ ॥

लब्धोऽनेन जयो नृपेण विशदो यस्मिन् महीमण्डले
तस्मिन् यावनभाषयाऽक्षरवरं फत्तेपुरं वासितम् ।
कृष्णेनेव विशालसुन्दरगृहं श्रीद्वारिकानामकं
भूपानां स्थितिरेषकैव हि जयस्थाने पुरस्थापनम् ॥ ८४ ॥

राज्यं तत्र करोति लब्धविजयः श्रीपातिसाकब्बरः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीफत्तेपुरनामके पुरवरे व्यापारिवर्गाश्रिते ।
चातुर्वर्ण्यगृहैर्जिनेशसदनैः षड्दर्शनोद्यन्मठैः
शोफीसद्दरवेशमुद्गलपदैश्चाट्टैर्वरैर्भ्राजिते ॥ ८५ ॥

अश्वा लक्षचतुष्टयं गजवरा द्वित्वे सहस्रा दश
क्रीडन्तीप्सितभोज्यलम्पटवो गावस्तु संख्यातिगाः ।
उष्ट्रा वा महिषीगणा नृपगृहद्वारेऽधिकाः पत्तयो
वीरा यत्र विलासलालसवपुःशोभा नृपाऽऽचैद्धनैः ॥ ८६ ॥

द्वात्रिंशन्मणभारलोहकमयीं हस्तेन यः शृङ्खला-
मुत्पाट्याभ्रपथेऽल्पकन्दुकमिव प्रोच्छालयत्यञ्जसा ।
एष श्रीमदकब्बरः क्षितितले केषां न हिन्द्वासुर-
क्ष्मापानां हृदये चमत्कृतिकरोऽस्त्यादर्शयन् दोर्बलम् ॥ ८७ ॥

केचिद् हिन्दुनृपा बलप्रवणतस्तस्य स्वपुत्रीगणं
गाढाभ्यर्थनया ददत्यविकला राज्यं निजं रक्षितुम् ।
केचित्प्राभृतमिन्दुकान्तरचनं मुक्त्वा पुरः पादयोः
पेतुः केचिदिवानुगाः परमिमे सर्वेऽपि तत्सेविनः ॥ ८८ ॥

हिन्दुम्लेच्छसुताः स्वरूपविजितश्रीशादिदेवाङ्गनाः
श्रूयन्तेऽस्य सहस्रमानगणिताः कान्ता लसद्भाग्यतः ।
तासां भोगफलं तु पुण्यललितं पुत्रत्रयं श्रूयते
जीवाः स्तोकतरा भवे सुततया ये स्युः क्षितिस्वामिनः ॥८९॥

अन्येद्युः स समस्तहिन्दुकलशं श्रीमेदपाटाधिपं
श्रीराणोदयसिंहमुद्धतबलं म्लेच्छाय पुत्री निजा ।
दत्ताऽस्मत्कुलपूर्वजैर्न च मया देयेति गर्वं गिरा
व्याख्यान्तं श्रुतवानकब्बरनृपः क्षोणीशशिक्षापरः ॥९०॥

तस्मै भूपतये विचारचतुरः प्रैषीन्निजं मन्त्रिणं
भूपः श्रीमदकब्बरः क्षितिपतिं राणं विशिष्टं विदन् ।
गत्वा मन्त्र्यवदत्तदीयसदसि स्पष्टं गिरा सारया
सन्तो यन्न वचःस्थितौ क्वचिदपि प्रोल्लङ्घयन्त्यग्रतः ॥९१॥

देहि त्वं स्वसुतामकब्बरमहीभर्त्रे परैर्हिन्दुभि-

येर्दत्ताः स्वसुताः स्वराज्यविभवक्षेमाय नाभ्यर्थितैः ।
एतावत् समयं प्रतीक्षितमिहाप्यर्थेन तद्युक्तिम-
यत्त्वं दक्षतमोऽसि योग्यसमयज्ञानाय किं कथ्यते ? ।। ९२ ।।

राणोऽप्याख्यदिदं कुलस्थितिरियं मे पूर्वजैः पालिता
यन्म्लेच्छाय न दीयते निजसुतेत्युल्लङ्घ्यते नो मया ।
देशो यातु गजाश्च यान्तु विभवध्वंसोऽस्तु मे पर्वते
वासोऽप्यस्तु कुलस्थितिः पितृकृताप्येकैव मे तिष्ठतु ।। ९३ ।।

।। तदुक्तम् ।।

लब्धां गुणौघजननीं जननीमिवार्या-
मत्यन्तशुद्धहृदया अनुवर्त्तमानाः ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ।। ९४ ।।

मन्त्र्याख्यन् नृपराण ! यन्निजसुतादाने हठः सांप्रतं
वाक्यं वादयतीह तादृशफलं तत्तेऽचिराद्दास्यति ।
यद्यद्भावि तदग्रतो निजमुखात् प्रायेण निष्काशये-
देवं प्रोच्य गतः प्रधानसचिवश्चाकब्बरस्यान्तिके ।।९५।।

उक्तं तस्य पुरो यथार्थवचनं राणोदितं मन्त्रिणा
सन्तोऽपीष्टमनिष्टमप्यवितथं कुर्वन्ति वाग्गोचरे ।
तद्वाक्यश्रवणादनन्तरमसौ फत्तेपुरान्निर्गतः
सैन्यैः सारतरैर्वृतो गिरिशिरःकोट्टादिभङ्गोद्यतैः ।।९६।।

तस्याऽभ्यागमनश्रुतेर्निजपुराद्राणो धनाद्यं निजं
लात्वा कुम्भलमेरुकोट्टमभजद् ग्राह्यं न वीरोत्तमैः ।
सामन्तो जयमल्लनामनृपतिः श्रीचित्रकूटेऽचट-
द्योद्धुं म्लेच्छबलैः समं स्वरभटस्तन्मार्गमध्यस्थिते ।।९७।।

तं वृत्तान्तमकब्बरक्षितिपतिः शुश्राव मार्गे वहं-
श्चित्तेऽचिन्तयदित्यशेषसुभटैः किं चित्रकूटाचलः ।
पूर्वं ग्राह्य उतैष कुम्भलगिरिः श्रीराणभूपाश्रय-
स्तद्भृत्यो जयमल्लभूपतिरसौ मन्मार्गवक्त्रे स्थितः ।। ९८ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तर्कपरस्य तस्य नृपतेर्मार्गे समागच्छतः
पार्श्वे श्रीजयमल्लनामनृपतिर्दूतं तदा प्राहिणोत् ।
दूतोऽप्याख्यदिदं महीश ! नृपतिश्रीराणभृत्यान्तिमो
मद्वक्त्रे जयमल्लभूपतिरिति त्वां ख्यापयत्युत्कटः ॥ ९९ ॥

त्वं चेद्भूपहमाउनन्दन इति ख्यातोऽसि तर्ह्यत्र मे
वक्त्रं दर्शय चेन्न तर्हि रुचिते स्थाने व्रजान्यत्र वा ।
त्वद्भक्तिं च विधातुमत्र विभुना राणेन संस्थापितः
प्रेष्योऽहं परमेश्वरस्य तदनु श्रीराणभूस्वामिनः ॥ १०० ॥

दूताख्यातमिदं निशम्य नृपतिः पूर्वं ततोऽत्रापतत्
कोट्टं पर्वतमस्तकस्थितमसौ श्रीचित्रकूटाभिधम् ।
दध्यौ वीक्ष्य हृदीति किं सुरगिरिः किं वैष कैलासको
वैताढ्यः किमु किं हिमाचल इव श्रीरोहणाद्रिः कथम्?॥१०१॥

एवं तर्कपरोऽपि सत्त्वजलधिस्तद्भञ्जनायोद्यत-
श्चक्रेऽकब्बरभूपतिर्घनतरोपायान् भटप्रेरकः ।
उच्चैःस्थो जयमल्लभूपतिरमुं वाणिज्यकारोपमं
चित्ते चिन्तयति स्म नृत्यमनिशं पात्रैस्तदाऽकारयत् ॥१०२॥

वीरास्तत्कपिशीर्षकेषु सबला भूपेन संस्थापिता-
वर्षन्तो विविधाश्मलोहनिबिडास्त्राणीव मेघाश्छटाः ।
चित्रं मुद्गललोकधान्यविषयं दुष्कालनीतिं तदा
चक्रुः कोट्टमहीतले च विजयव्यासक्तसौभिक्षकम् ॥१०३॥

सामान्योऽपि जनस्तदा धनिबलात् कोट्टोर्द्ध्वभूमौ स्थितो
धिक्कारं वचसा विधाय मुमुचे यत् प्रस्तरार्द्धार्द्धकम् ।
तत् सैन्येऽजनि मौद्गले हरिकरव्यामुक्तवज्रोपमं
तेजस्विन्यधिपे दिवाकर इवाहःसन्निभाः सेवकाः ॥१०४॥

एवं श्रीजयमल्लभूपसुभटश्रीचित्रकूटाचल-
त्राणार्थं स्वकरद्वयं खरतरैः शस्त्रैर्न शून्यं कृतम् ।
वक्त्रं मुद्गलनाथधिक्कृतिकृते दुष्टैर्वचोभिर्जनैः
सामान्यैरपि चित्रकूटनगरान्तर्वासिभिः सादरम् ॥१०५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा वीरकरान् समस्तमनुजास्योद्भूतदुर्वाक्चयं
श्रुत्वा चाल्यदकब्बरो नरपतिर्गृह्णामि चेदेतकम् ।
तत्सर्वान् पुरुषान्निहन्मि वनितावन्धं भटैः कारया-
मीति स्पष्टगिरा समस्तसुभटानुत्साहयन् सत्त्वतः ॥ १०६ ॥

क्रुद्धोऽकब्बरभूपतिर्गिरितले गुप्तं तथा खानयन्
मार्गं तत्र यथा चतुर्दशशतप्रायैर्मणैरौषधम् ।
भृत्पात्रं शिखिबिन्दुसङ्गविलसत्तेजोऽतिशक्त्या दृष-
द्दुर्गास्फालनतो मनुष्यनिकरव्यापत्तये सज्जितम् ॥१०७॥

तद्भाग्याद् जयमल्लनामनृपतेः श्रीचित्रकूटाचल-
व्याबाधां न चकार सम्मुखमदः सैन्ये पतन्मौद्गले ।
मातङ्गांश्च नरान् सहस्रगणितान् हन्ति स्म जातं ततः
सत्यं यत्र परस्य चिन्त्यत इहाभ्येत्येव तत् सम्मुखम् ॥१०८॥

तज्ज्ञात्वा जयमल्लनामनृपतेर्वीरा जहर्षुस्तदा
गायन्ति स्म च राणगीतनिकरं नित्योत्सवानन्दिनः ।
मत्वाऽकब्बरभूपतिर्निजबलध्वंसं मनोदुःखवान्
यावत्तद् ग्रहणग्रहं श्लथतरं कृत्वा विखिन्नोऽभवत् ॥१०९॥

तावन्नागपुरीयगच्छशिथिलोपाध्यायलिङ्गी खरः
शास्त्राजीवनकृच्चकार विशदं कोट्टस्य चक्रं हृदा ।
आख्यत् सप्तदिनैश्च भङ्गमतुलव्यायाससाध्यं गिरे-
र्भूपाग्रे जयमल्लभूपमरणं रोमीकरायोघनात् ॥११०॥

तच्छ्रुत्वा स्वबलं गिरिग्रहपरं सज्जाश्रमश्वस्थितं
भूपः प्रेरितवान् करासिविभवः पृष्ठे स्थितो भापयन् ।
पश्चादापततो भटान्निजपदोपास्त्युद्यतं रोमिकं
चैकं श्रीजयमल्लभूपतिवधे स्वर्णार्पणेनादिशत् ॥१११॥

दुष्टात्मा किल रोमिकोऽपि सहसोत्प्लुत्याद्रिमूर्द्धस्थितः
स्वास्त्रं गोलकमग्निपुञ्जकलितं चिक्षेप तत्सम्मुखम् ।
सोऽपि श्रीजयमल्लभूपतिशिरोमध्ये विशन्निर्गतः
श्लाघ्यं जाल्महृदीव धार्मिकहृदीवासभ्यवाक्यान्वयः ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावच्छ्रीजयमल्लभूपतिरसौ भूमौ पतन्नित्यवक्
भो वीराः ! अथ यास्यतीव कुसुतो हस्तादयं पर्वतः ।
तस्मान्मन्मुखदर्शिनो घनजनानत्राधिरूढान्निजं
स्थानं साधु नयन्तु मार्गकरणेनात्मीयदोर्वीर्यतः ॥११३॥

जल्पन् श्रीजयमल्लभूपतिरिति प्राप्तस्तदा पञ्चतां
लोकास्तत्र घनाः स्थिता निजनिजश्रीदेवसेवापराः ।
वीराः श्रीमति चित्रकूटनगरद्वारेऽसिकुन्तग्रहा-
निघ्नन्तोऽभिपतद्भटावलिशिरांसीवाममृद्गोलकान् ॥११४॥

भूपाकब्बरनुन्नवीरनिचयाः सद्योऽधिरूढा गिरौ
हत्वा श्रीजयमल्लभूपतिभटान्निर्नायका यत् कुतः ।
जीवन्तो जयिनो भवन्ति च तथा वीराधिवीराग्रतः
प्रायः स्वामिदशानुसारिबलिनः स्युः सेवकाः सर्वदा ॥११५॥

वीरैस्तत्र वृतोऽप्यकब्बरनृपोऽभ्यारूढ उच्चैरिव
व्योम्न्यर्कः प्रबलप्रतापकलितः कोपोद्धुरस्तन्नृषु ।
आदेशं स वधस्य मुद्गलततेः शीघ्रं ददौ यन्नरः
कोपात् किं न करोति वह्नि च हृदन्धीकारकत्वस्पृशः?॥११६॥

भूपाकब्बरवाक्यमाप्य सुभटा दुष्टास्तथा चक्रिरे
तत्राऽभूद्भुवि शोणितोदकनदीपूरं यथा सर्वतः ।
तत्र स्थातुमशक्त एष नृपतिर्नीचैस्ततोऽप्युत्तरन्
मार्गस्थां च विदारितोदरतलां निष्पातिताऽङ्गोद्भवाम् ॥११७॥

दृष्ट्वा सुन्दरसुन्दरीं नरपतिः कारुण्यपूर्णस्तदा
हा हा किं मयकाऽत्र कारितमिदं चण्डालकर्माधिकम् ? ।
कुर्वंश्चानुशयं शिरः करयुगेणास्फालयन्नित्यवक्
यः पापं किल चित्रकूटरचनं गृह्णाति तस्याप्यहम् ॥११८॥

एनं देशपुरान्वितं गिरिवरं स्वर्णादिकं चार्पया-
मीत्याकर्ण्य नराऽधमोऽथ जगृहे कश्चित्त्वघं मुद्गलः ।
तद्दत्तं च गिरीश्वरं पुरवरग्रामाद्युपेतं तदा
लोभात् किं न नरः प्रपद्यत इह स्वाम्युक्तवाक्सञ्चयम्?॥११९॥

॥ त्रिभिः कुलकम् ॥

भूपोऽप्येष समाधिमाश्रिजभटैरावेष्टितो राणके
देशे शासनमुत्तमं निजपदेनावर्त्तयत् सर्वतः ।
जीवन्तं किल पापभीरुकतया राणं पुनर्मुक्तवान्
भव्यः पापकृतेर्बिभेति हृदये कृत्वैकवारं पुनः ॥१२०॥

एवं मालवमेदपाटधनिकान् श्रीगुर्जरस्वामिनो
जित्वाऽकब्बरभूपतिर्निजपुरे सौख्यात्समापेतिवान् ।
राज्यं पालयति प्रपञ्चनिपुणः षाड्गुण्यसच्छक्तिमान्
सम्यग्दर्शनपण्डितादरकरस्तच्छास्त्रशुश्रूषया ॥१२१॥

अन्येद्युः स समस्तदर्शनयतीनाकार्य धर्मस्य स-
त्तत्त्वं पृच्छति शुद्धबुद्धिविभवः स्मार्थी शिवस्यादरात् ।
तेऽप्याहुर्निजदर्शनोदितपथं वाग्विभ्रमैरभ्रमै-
र्नैकस्यापि बभूव तस्य रुचये मार्गो विचाराऽसहः ॥१२२॥

एवं तस्य शिवार्थिनः प्रातिदिनं धर्मं बुभुत्सोः शुचिं
शुद्धाध्वैकगवेषकस्य नगरे काचित्परा श्राविका ।
षण्मासप्रतिमोपवासरचनां कुर्वत्यसंख्योदया
यान्त्यर्हत्प्रतिमाप्रणामविधये दृग्मार्गमभ्यागता ॥१२३॥

इभ्यैर्या नरवाह्यवाहनचतुष्कोणाङ्गणे स्थापिता
वाद्याडम्बरमण्डिता घनजनव्यूहान्विता निर्मला ।
गङ्गेवाऽखिलपण्डितस्तुतिपदान्यासादयन्ती सती
शुद्धानन्ततपःप्रभावजनितं तेजो वहन्त्युत्तरम् ॥ १२४ ॥

केयं याति किमर्थमत्र नगरे कृत्वा महाडम्बर-
मित्थं प्रश्नपरं नरेश्वरवरं प्रत्याह रामात्मजः ।
मन्त्री स्थानकसिंह आर्हतपतिर्बद्धाञ्जलिर्हे प्रभो !
षण्मासीतप एतयादृतमिहार्हच्छास्त्रवित्कारितम् ॥ १२५ ॥

नान्नं नापि फलं न दुग्धमथवा तक्रं न दध्यादिकं
पक्वान्नं न लवङ्गपूगशकलं नास्वादयत्याह्नि वा ।
रात्रौ यावदियं विशिष्टतपसः षण्मासकालस्थितेः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्त्ति चोष्णजलं दिवैव पिबति श्रीवीतरागाज्ञया ॥१२६॥
इत्याकर्ण्य नरेश्वरो निजचरैश्छन्नं हि तस्याः स्थितिं
रात्रौ वाह्नि गवेषयत्यनुदिनं तद्वाक्परीक्षाकृते ।
तस्यास्ते विमलं तपोविधिमलं निश्चित्य सत्यंवदाः
सत्यं प्राहुरिहाऽस्ति नैव कपटं न्याये यथा त्वत्कृते ॥१२७॥

श्रुत्वा वाचमिमां चरव्रजमुखाच्चित्ते चमत्कारवां-
स्तामाकार्य वरादरेण नृपतिः पप्रच्छ भक्त्येत्यसौ ।
हे मातः ! तप ईदृशं खरतरं कस्याऽनुभावात्त्वया
शुद्धं साधु विधीयते वद मनःशङ्कां विहायोत्तमे ! ॥१२८॥

सा प्राहाऽत्र तपस्कृतौ नरपते ! श्रीदेवगुर्वोर्ममा-
ऽतुच्छः सूर्यकरावदातचरितः सम्यक्प्रभावोऽस्त्यहो ।
को देवस्तव को गुरुश्च जगतीत्युक्ते नृपेणाऽवदत्
सा श्राद्धी जिनशास्त्रतत्त्वविशदा चेत्थं स्वरूपं तयोः ॥१२९॥

नो रागाङ्गारसङ्गो न मदनमदिरा न द्विषद्द्वेषदोषो
नो सम्मोहप्ररोहो न विकटकपटाटोपसंपच्च यस्य ।
शान्तः कान्तस्त्रिलोकीकलनकुशलवित् कोऽपि कोपादिमुक्त-
स्त्यक्तः संसारपाशैः स भवति भविनां देवता दैवयोगात् ॥१३०॥

ईदृग् देव इहाऽस्ति बिम्बरचनाध्येयोऽधुना सिद्धिद-
श्चित्ते मे सुगुरुस्तु संयमधनः स्वान्यात्मतुल्याशयः ।
मित्रे शत्रुचये समोऽश्मनि मणौ स्त्रैणे तृणौघे पुन-
र्नाम्ना सांप्रतमस्ति हीरविजयाचार्यः सुसाधूत्तमः ॥१३१॥

श्राद्धीवाक्यमिदं निशम्य नृपतिस्तां पूजयित्वाऽधिकं
स्वस्थाने विससर्ज मन्त्रिणमथोचे स्थानसिंहाभिधम् ।
कस्मिन्नऽस्ति पुरे स हीरविजयाचार्यः सुसाधूत्तमः
संप्रत्यऽप्यधिको यदीयमहिमाऽऽचारश्च पूर्वं श्रुतः ॥१३२॥

मन्त्र्याख्यन् नृप ! नास्ति तस्य वसतिर्ह्येकत्र देशे पुरे
सर्वत्र द्विसहस्रसंयमिगुरोः पादश्रमेणाटनम् ।
वर्षामासचतुष्टयास्थितिमसावेकत्र कुर्वन् क्रमात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संप्रत्युत्तमधार्मिकेऽस्ति नगरे गन्धारके बन्दिरे ॥१३३॥

श्रुत्वेत्याह महीपतिर्मम महाभृत्यान् सलेखानितः
पार्श्वे तस्य गुरोरिहोत्तमगुरोराकारणायोद्यतान् ।
शीघ्रं प्रेषय ते च शिष्यकलितं ह्यत्रानयेत्युत्तमा-
माज्ञां प्राप्य महीपतेः स सचिवः सर्वं तथा निर्ममे ॥१३४॥

गन्धाराख्यपुरे तदैव नृपतेर्दूताः सलेखाः शुभा–
आयाता इति रामजीकमनजीकाद्यैर्महाश्रावकैः ।
श्रुत्वा हर्षभरात् सुवर्णमणिभिर्वर्द्धापिताः श्रीगुरो-
र्भूपाज्ञां निजहस्तलेखलिखितां सन्दर्शयन्त्युद्वदाः ॥१३५॥

आज्ञां भूमिपतेर्विचार्य यतिराट् शिष्यान्वितस्तत्पुरा-
द्वर्षामासचतुष्टयादनु शुभे सद्यश्चचाल क्षणे ।
रात्रौ ध्यानधरस्य तस्य सुगुरोः सुप्तस्य पेतुः पुरे
कस्मिंश्चिज्जिनशासनामरकरान्मुक्ताः शिरस्युज्ज्वलाः ॥१३६॥

ईर्याशुद्धिधरा विहारपटवः श्रीसूरयोऽभ्यागताः
दीप्रेऽहम्मदवादनामनगरे भूभूषणेऽर्हद्गृहैः ।
श्राद्धास्तत्र निवासिनो घनतरं चक्रुः प्रवेशोत्सवं
कान्तारेऽपि सतां महोत्सवभवश्चेत्तत्र किं सत्पुरे ? ॥१३७॥

खानस्तत्र च साहिबाख्यनृपतिः श्रीपातिसाऽकब्बरा–
देशस्थः स्वसभाङ्गणे गुरुवरानाकार्य चक्रेऽर्चनाम् ।
अग्रे ढौकितवांश्च रत्नकनकस्थालं विशालं न त-
न्निर्ग्रन्थावलिनायकैर्गुरुवरैः स्पृष्टं करेणाप्यहो ॥१३८॥

एते निःस्पृहपुङ्गवा यतिवराः श्रीमत्खुदारूपिणो
दृश्यन्तेऽत्र न चेदृशाः क्षितितले दृष्टा विशिष्टाः क्वचित् ।
एवं तेन तदीयसुद्गलभटैः सम्यक्त्वं प्रापिता–
वाद्याडम्बरपूर्वकं निजगृहात् साध्वाश्रमे प्रेषिताः ॥१३९॥

तस्माच्छ्रीगुरवः पुराच्छुभदिने चेलुर्यतिभ्राजिताः
स्युर्हंसा इव साधवः स्वसमये नैव प्रमत्ता यतः ।
आयाताः क्रमतो विहारचारिणः श्रीपत्तनाख्ये पुरे–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्नत्यैर्व्यवहारिभिर्वरमुदाङ्गेष्वार्चिताः स्वर्णकैः ॥ १४० ॥
आढ्या तत्र कयाचिदत्यधिकया भावेन वित्तेन च
कर्त्तुं श्रीजिनशासनोदयमिति श्रीमद्गुरोरागमात् ।
षड्लक्षै रचनां त्रिकोटृघटनामर्हद्गृहस्यादरा-
द्विम्बन्यासमकारयच्च विविधानेकाङ्गिबोधिप्रदम् ॥१४१॥

विजयसेनमहोदयसूरिभिर्विमलवाचकधर्मकसागरैः ।
घनतरैरपरैश्च कवीश्वरैः परिवृता गुरवोऽत्र समागताः ॥१४२॥

तत्राभूद्व्यवहारिवर्गविहितस्ताहक् तदाऽत्युत्सवो
याहग् वीरजिने समस्तगणभृत्साध्वन्वितेऽप्यागते ।
देवेन्द्रैर्विहितश्चतुर्थसमये साक्षात्रिकोट्टाश्रये
सत्सु स्यान्न हि किं सतामनुकृतिः सर्वत्र सञ्चारिषु ?॥१४३॥

एवं सप्त दिनानि हीरविजयाचार्याः पुरेऽत्र स्थिता-
नित्यं तत्प्रतिमाप्रणामसमये ताहग्महःपूर्वकम् ।
चेलुस्तत्र च धर्मसागरमहोपाध्यायमुख्यान् यतीन्
संस्थाप्याऽनुगमोद्यतान् हितकरीं दत्त्वा सुशिक्षां ततः ॥१४४॥

विजयसेनमहोदयसूरयो हठधरा निजसद्गुरुसेवने ।
अनुचरा इव सद्गुरुभिः समं पुरवरे खलु सिद्धपुरे गताः ॥१४५॥

तांस्तत्रैव विशिष्टवाक्यरचनां शिक्षां स्वगच्छार्पणा-
द्दत्त्वाऽऽस्थाप्य च तेऽथ शिष्यकलिताः श्रीशान्तिचन्द्रादिकान् ।
लात्वा सार्द्धमनल्पशास्त्रनिपुणांश्चेलुस्ततः पण्डितान्
विज्ञा एव हि राजसंसदि सदा स्युर्भूषणं नापरे ॥ १४६ ॥

ते श्रीसूरिवराः सुहीरविजयाचार्या विहारक्रमाद्
ग्रामे कौलिकराजके सुरतरौ प्राप्ताः सुशिष्यान्विताः ।
तत्राऽनेकमहोत्सवं धनिजनैः सार्द्धं स राजा व्यधा-
च्छ्रीगुर्वागममोदतो गुरुगुणश्रुत्यैव सावर्जनः ॥१४७॥

राजा तत्र निजे गृहे निजवशावन्दापनार्थं गुरू-
नाकार्य स्वगृहाङ्गणे धृतपदान्मुक्ताफलैर्देववत् ।
वर्द्धाप्योत्तमवस्त्रचक्रममुचत्तेषां पुरो भावतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संगृह्णन्ति न तस्य खण्डमपि ते स्म त्यक्तलोभास्तदा ॥१४८॥
तेषां निःस्पृहचेतसां नरवरः शुद्धोपदेशं तदा
श्रुत्वा कौलिकनायकः पशुवधस्तैन्यादिदुष्कर्मणाम् ।
प्रत्याख्यानमनन्तसौख्यकरणं चक्रे स्वभृत्यैः समं
सन्तो दुष्कृतवर्जका निजगिरा स्युर्दुष्कृतध्यायिनाम् ॥१४९॥
भूपं कौलिकचक्रमादृतमहाधर्मं विधायोद्यता-
श्चेलुस्तन्नगरात् सुहीरविजयाचार्या विहारक्रमात् ।
सीरोह्यां जिनचैत्यसन्ततिजितस्वर्नाथपुर्यां गताः
पुर्यां भावुकलोकनेत्रयुगलानन्दप्रदास्याम्बुजाः ॥१५०॥
तत्र श्रीसुलताननामनृपतिः श्रुत्वा तदीयागमं
पुर्यां घोषणमित्यकारयदहो हट्टे गृहे मण्डनम् ।
स्वे स्वे यो न करिष्यति प्रणयतः श्रीमद्गुरोरागमे
दण्ड्यो मे भविता स सर्वविभवध्वंसस्तु तस्यागतः ॥१५१॥
श्रुत्वैवं सुगुरुप्रवेशमहसे चक्रुर्जना मण्डनं
धाम्नां हट्टततेरिवात्ममनसां द्रव्यव्ययाद्वर्णकैः ।
मातङ्गांश्च हयान् विशिष्टरचनान् कृत्वा नृपोऽभ्यागतः
पौरैर्निर्मलभूषणैः सममसौ तेषां पपात क्रमे ॥ १५२ ॥
पादाभ्यां नृपतिर्गुरोः पुर इव प्रेष्यश्चलन् भक्तितः
पुर्यां कारयति स्म दत्तविभवोऽर्थिभ्यः प्रवेशं तदा ।
श्राद्धानां हृदयेऽभवद्धरिकृतश्रीनेमिनाथागम-
प्रोद्दामोत्सवराजिराजिततरश्रीद्वारिकापूःस्मृतिः ॥ १५३ ॥
तत्रार्हत्सदनेषु बिम्बनिवहं रूप्याश्मचामीकरा-
रब्धं सूरिवराः प्रणेमुरनिशं राजेभ्यवर्गान्विताः ।
व्याख्यान्ति स्म च जैनवाङ्मयरसं राजादिसभ्याग्रतो
राजस्त्रीभिरनेकयुक्तिरचनोद्यन्मौक्तिकस्वस्तिकाः ॥ १५४ ॥
स्थित्वा तत्र कियद्दिनानि सुकृतप्राग्भारसंवर्द्धनं
कुर्वन्तः पुरतस्ततोऽथ चलिताः सूरीश्वराश्चर्यया ।
ग्रामाऽनेकपुराणि पावितमहीपीठानि नित्याक्रमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुल्लक्ष्याशु गताः सुसाधुकलिताः श्रीमेडताख्ये पुरे ॥१५५॥

श्रुत्वा तत्र भटालिसेवितपदः श्रीसादिमो मुद्गल-
श्रक्रे सङ्गपुरस्कृतो हयगजैर्वीरैः सहाभ्यागतः ।
सूरीणां नगरप्रवेशमहसे सर्वार्थिसाङ्गक्षशो-
वित्तानि स्वभुजार्जितानि रचयन् श्रीजैनमार्गोदयम् ॥१५६॥

तेनेत्थं विविधोत्सवेन गुरवस्तत्र प्रवेश्यार्चिता-
स्तेषां शासनमात्ममूर्द्धनि धृतं जीवाऽवनाद्यं निजे ।
तत्र श्रीगुरुजातमत्सरभराः केचित् पुनर्लिङ्गिन-
स्तद्योग्योत्कटशिक्षया निजधिया कामं निषिद्धास्तदा ॥१५७॥

तत्रार्हत्प्रतिमाप्रणामविषये श्रीसूरयः सोद्यमाः
सप्तक्षेत्रधनव्ययोत्थितफलं व्याख्यानयन्तोऽङ्गिनाम् ।
सम्यक्त्वं व्रतधारितां यतिपथं वा भद्रकान्तस्थितिम्
केषाञ्चित् स्म ददत्यनन्तगुणिनः स्युर्यत्परार्थाग्रहाः ॥१५८॥

स्थित्वा तत्र दिनद्वयं गुरुवराः शीघ्रं ततश्चारिणो
मार्गोऽतिक्रमणेन संयमियुताः सन्मार्गनिर्वाहकाः ।
साङ्गानेरपुरे गता धनजनानन्दप्रदा दुर्मति-
च्छेदैर्विश्रुतनामधेयमहिमव्याप्तान्तरिक्षोदराः ॥१५९॥

साङ्गानेरपुरागमं यतिपतेः शुश्राव दिल्लीपतिः
श्रीफत्तेपुरसर्ववर्णनिकरं चाभ्यागमे प्राहिणोत् ।
श्राद्धास्तत्र सुखासनोत्तमगजाध्यारूढपुत्राङ्गना-
युक्तास्तच्चरणारविन्दनतये तावत्ततोऽभ्यागताः ॥१६०॥

श्राद्धास्तत्र नवाङ्गपूजनमिमे चक्रुः सुवर्णैस्तथा
सूरीशस्य यथा च तैः समुदितैः कोशो भवेद्भूपतेः ।
एकस्तीर्थकरोपमः कलियुगे संसारदुःखार्त्तिहृ-
द्येनायं किल पूज्यते तदिह कः स्यात्पूजनार्हः परः ॥१६१॥

श्राद्धैर्लक्षमितैर्द्विलक्षगणितैश्चान्यैर्नरैर्दिल्लिराट्-
शिक्षातोऽत्र समागतैः परिवृताश्चेलुस्ततः सूरयः ।
श्रीमद्वीरजिनेन्द्रमन्त्रजपकास्तच्छासनोद्दीप्तये

भूपाकब्बरसंगमाय विहितोत्साहाः पवित्राशयाः ॥१६२॥
आयाता इह नाथ! हीरविजयाचार्याः सुशिष्यान्विता–
इत्थं स्थानकसिंहवाचिकमसौ श्रुत्वा नृपोऽकब्बरः ।
स्वं सैन्यं सकलं फतेपुरपुराद्व्यूतषट्कान्तरा–
यातानामभिसम्मुखं यतिपतीनां प्राहिणोत् स्फीतियुक् ॥१६३॥

पुत्रैरेव निजैस्त्रिभिः परिवृतस्तस्थौ नृपः पर्षदि
म्लेच्छाः काफर एष जात इति मा कुर्वन्तु हृत्खेदिताम् ।
ध्यात्वैवेति न राज्यसंभवमदाद्यत्तादृशानां तथा
सर्वेषामनुवर्त्तनं न च मदः स्वप्नेऽपि संपत्तिजः ॥१६४॥

तत्सैन्यैर्हयहस्तिवीरपदिकैरावेष्टिताः सर्वतः
श्रीसूरिप्रवरास्तदीयवदनाम्भोजेक्षणप्रार्थिभिः ।
ब्रह्माण्डोदरपूरकारवभरेषूद्दामवाद्येष्विभ-
स्कन्धारूढसहस्रसंख्यमनुजाभ्यास्फालितेषूच्चकैः ॥१६५॥

श्राद्धीभिश्च पदे पदे निजकरप्रोच्छालितेषूल्लसन्–
मुक्ताराशिषु सर्वलोकवनितावर्गेण संनिर्मिते ।
रूप्यैर्न्युञ्छनके विशिष्टवनिताक्लृप्तेषु गीतेष्विह
प्राप्ताः श्रीमदकब्बरौकसि तदा फत्तेपुरान्तःस्थिते ॥१६६॥
॥ युग्मम् ॥

स्वौकोद्वारि समागतान् यतिपतीन् दृष्ट्वा नृपोऽकब्बरः
पुत्रैः स्वैः सममेव संभ्रमवशादुत्थाय सिंहासनात् ।
अभ्यागत्य ननाम तेन विधिना येनैष विज्ञैस्तदा
श्राद्धः प्राचि भवे बभूव मनसीत्याशङ्कितं तार्किकैः ॥१६७॥

चङ्गाहोगुरुजीतिवाक्यचतुरो हस्ते निजे तत्करम्
कृत्वा सूरिवराञ्जिनाय सदनान्तर्वस्त्ररुद्धाङ्गणे ।
तावच्छ्रीगुरवस्तु पादकमलं नारोपयन्तस्तदा
वस्त्राणामुपरीति भूमिपतिना पृष्टाः किमेतद् गुरो ! ॥१६८॥

आहुः सूरिवरा नरेन्द्र ! वसनाधःकीटिकाद्यङ्गिनां
पीडा मत्क्रमजास्तु मेति हृदये धीः स्याद्यतेर्यत्नतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैतस्योपरि मुच्यते न मयका स्वं पादपद्मं जिनैः
सर्वत्रापि यतेर्विशेषयतना प्रोक्ता स्वकीयागमे ॥१६९॥

सूरीणामितिवाक्यसंश्रवणतः श्रीपातिसाऽकब्बर-
स्तद्वस्त्रे स्वकरेण दूरविहितेऽधःकीटिकानिर्गमम् ।
दृष्ट्वा प्राप चमत्कृतिं गुरुगिरि प्रत्यक्षसंवादतः
सर्वज्ञागम एव शुद्ध इति चार्हच्छासनास्थां पुनः ॥१७०॥

शुद्धायां भुवि सञ्चरन्नथ नृपः सञ्चारयंस्तान् गुरून्
स्वस्वर्णासनसन्निधिं सुवचनैर्नीत्वाऽवदत्प्रीतिमान् ।
अत्रैवोपदिशन्तु धार्मिकशिरश्चूडामणिस्त्वक्रम-
स्पर्शात्पावितमध्यमेतदपि च स्याद्वालवन्मे गुरो ! ॥१७१॥

आहुः श्रीगुरवः सुवर्णरजतस्पर्शो न कल्प्यः सदा
भिक्षूणामिति भूपते ! ननु मया तत्रोपवेश्यं त्विह ।
इत्युक्त्वा नृपतेरवग्रहमहीदेशे पवित्रे स्थिता-
भास्वत्पण्डितशान्तिचन्द्रगणिराड्धन्यादिशिष्यान्विताः॥१७२॥

तेषां भूमिपतिः पुरः स्थित इति स्पष्टं जगौ शुद्धधी-
र्द्धर्मं मुक्तिकरं वदन्तु मम भोः ! निर्दम्भवाक्यैर्मुदा ।
यादृग् वाङ्मयसन्ततौ त्रिजगतीनाथेन सन्दर्शितो-
यादृक् संप्रति साधुभिश्च गृहिभिर्जैनैरनुष्ठीयते ॥१७३॥

इत्युक्ते क्षितिपेन भिक्षुपतयः प्राहुर्जिनोक्तागम-
श्लोकोच्चारपुरस्सरं विशदया वाचा सुधासारया ।
धर्मं साधुगृहस्थयोग्यमसमैः सत्त्वाधिकैः पालितं
पाल्यं साम्प्रतबिन्दुमात्रमपि तं सिद्धिप्रदं शुद्धितः ॥१७४॥

तद्धर्मश्रवणादनन्तरमसौ चक्रे परीक्षां नृपः
सूरीणां पुरतः सुवर्णनिभृतं स्थालत्रयं मुक्तवान् ।
द्रव्याऽमूल्यकवस्त्रराशिममुचद् गृह्णन्तु यच्छन्तु वा-
ऽन्येभ्यश्चेत्यवदद्विनीतवचनः श्रीपातिसाऽकब्बरः ॥१७५॥

प्राहुः सूरिवरास्तपोधनततेः कल्प्यं न चामीकरं
*द्रव्यं चान्यदपीह मोहजननात् संसारसंवर्द्धकम् ।*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्त्रं चैतदपीशपिण्डकतया मूल्याऽतिरेकादपि
माह्यं नैव परप्रदानविधयोऽन्यार्थस्य नो सङ्गताः ॥१७६॥

इत्थं सूरिवरान् परीक्ष्य विविधोपायैर्महीनायक–
स्तद्युक्तिक्षमतां परीक्षितुमथ स्वैस्तार्किकैः पण्डितैः ।
सार्द्धं शास्त्रविचारसत्यसमयज्ञानाय सोऽवादय-
द्दक्षः शक्तियुतो दृढं हि कुरुते कार्यं जनश्लाघितम् ॥१७७॥

तत्रैकेन समस्तभूपविबुधोत्तंसेन सूरीश्वराः
सार्द्धं जल्पमनल्पकल्परचितं कुर्वन्त्यनिन्द्यं स्म ते ।
भास्वत्पण्डितशान्तिचन्द्रगणयस्त्वन्यैः समग्रैः समं
दत्ताज्ञा गुरुभिर्नृपेण च समं शिष्या विनीता यतः ॥१७८॥

ते सर्वे विबुधास्तदीयवचनैर्न्यायोपपन्नैश्चम-
त्कारं प्राप्तहृदो वदन्ति नृपतेः सत्यप्रतस्तात्त्विकाः ।
नास्माभिर्नरनाथ ! सुश्रुतवरा एतादृशाः पण्डिता-
युक्तिक्षोदसहार्यमार्गरचनावक्तृत्वयुक्पालनाः ॥१७९॥

इत्थं तैर्विहितस्तवं निजधियाऽऽचारं च तेषां नृपः
श्रुत्वा वीक्ष्य परीक्षणक्षममसौ निर्दूषणं रञ्जितः ।
सूरीणामिदमाह योजितकरद्वन्द्वः पतन्मस्तको-
भूपाः स्युर्ननु भृत्यकर्मनिपुणा यत्निःस्पृहाणां पुरः ॥१८०॥

तुष्टोऽहं भवतां विचारचतुराचारं पुनस्तार्किक-
श्रेणिश्लाघ्यविचक्षणत्वमसमं दृष्ट्वा गुणावर्जितः ।
भोः श्रीसूरिवराः ! तदिष्टमनघं मत्तो ध्रुवं मार्गय-
न्तूक्तं यद्भवदागमे नृपहरिश्रीचक्रिभिः साधितम् ॥१८१॥

इत्युक्ते क्षितिपेन हीरविजयाचार्या जगुर्भो नृप !
त्वत्पार्श्वेऽत्र यमर्थिभिर्गतभयैरस्माभिरभ्यर्थ्यते ।
गुप्तिक्षिप्तसमस्तबन्दिजनतामोक्षः पुनर्डाबरे
नो मत्स्यादिवधो न चागलितवार्ग्राहस्तटाकोत्तमे ॥१८२॥

प्राप्ते पर्युषणाख्यपर्वणि तथाऽमारिप्रघोषो दिनान्
यावत् सूर्यमितांस्त्वदीयसकले देशे त्वयाब्दं प्रति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्यश्चेति मदीप्सितं त्रयमिदं राज्याङ्कमुद्राङ्कितं
कामं दत्तवता न किं नरपते ! दत्तं त्वया सांप्रतम् ? ॥१८३॥
इत्युक्ते यतिपुङ्गवैर्नरपतिस्तान् बन्दिलोकान् घनान्
गुप्त्यन्तश्चिरसञ्चितान् कृतमहामन्तून् मुमोच स्वयम् ।
यावत्तान्निजपादनत्यनुरतान् श्रीमद्गुरूणां क्रम-
द्वन्द्वे पातयति स्म चाशिषदिमान् श्रीहीरनामाक्षरान् ॥१८४॥
मत्स्याद्यङ्गिगणावधं गलितवाग्राहं समुद्दिश्य स
श्रीमड्डावरनामकोप्रसरसि श्रीपातिसाऽकब्बरः ।
भृत्यैरुत्पटहं पुरेऽखिलजनज्ञानाय चाऽवादय-
त्तत्रैतद्विधिलोपकग्रहकृते छन्नं चरानादिशत् ॥१८५॥
प्रत्यब्दं नृपतिः समागतमहापर्वण्यमारिक्रमः
कार्यो मद्विषयेष्विति स्वलिखितं दत्ते स्म सञ्जाय सः ।
यावद्द्वादशवासरानथ महापर्वागमे तादृशं
तत्सर्वत्र तदर्थमेति सचरं तत्साधकं वर्त्तते ॥१८६॥
एवं श्रीगुरुमार्गितं नरपतिर्वस्तुत्रयं दत्तवान्
सन्तः प्रार्थितदायका इति वचस्तेनैव सत्यं कृतम् ।
धन्यास्ते गुरवो यदीयवचनं भूमौ मनाग्नापत-
द्धन्योऽसावपि यत्पुरो गुरुवरा जातास्तदभ्यर्थकाः ॥१८७॥
श्राद्धोपाश्रयभूमिपावनकृते तेनैव भूस्वामिना
दत्ताज्ञा अथ सूरिहीरविजया राजाङ्गणादुत्थिताः ।
तन्नुन्नैः कविराजतार्किकगणैर्वीरैरमात्यैः पुर-
श्रेष्ठैश्चानुगतास्तदीयसदनद्वाराद्बहिर्निर्गताः ॥१८८॥
तावत्पादचरोऽनुगः क्षितिपतिः पादौ प्रणम्य स्थितः
स्वौकोद्वारि समस्तसैनिकजनांस्तेषामनुप्राहिणोत् ।
वाद्यानीभशिरःस्थयोग्यपुरुषाभ्यास्फालितान्युच्चकैः
सूरीणां पुरतश्चकार च रथाश्वेभादिकां स्वश्रियम् ॥१८९॥
एवं भूपतिकारितेन महता ह्याडम्बरेणाथ ते
सूरीशा नगरे चतुष्पथपथान्तःसञ्चरन्तस्तदा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शङ्कां तीर्थकरागमस्य हृदये केषां न चक्रुस्तथा
प्रेम्णे तीर्थकरा इवाधिकाधियां चासन् गुणैर्निर्मलैः ॥१९०॥
श्राद्धास्तत्र पदे पदेऽथ मुमुचुर्वस्त्राणि सौवर्णिकान्
सूरीणां जगृहुश्च याचकजनास्तेषां गुणाभाषिणः ।
श्राद्धीभिर्वरमौक्तिकैर्मणिगणैर्वर्द्धापनार्थं तदा
नुन्नैः पाणियुगेन वारिनिधिवत्तद्भूतलं व्यानशे ॥१९१॥
आयाता अथ सूरयो यतियुता योग्ये पवित्राश्रये
श्लोकं धार्मिकमेकमाप्तवचनं व्याख्यान्ति ते स्माऽनघम् ।
अन्माऽयं किमिहागतः शुचितरं धर्मं पुरस्ताच्चतु-
र्वर्णानामुपदेष्टुमेवमखिलाश्चक्रुर्द्विजाः शङ्कितम् ॥१९२॥
तत्र स्वस्तिकलक्षमक्षतगणाकीर्णं घनिक्षीकृता-
नेकन्युञ्छनवित्तकोटिरभवच्छ्रीस्थानसिंहादिकैः ।
इभ्यै रूप्यसुवर्णनव्यवसनत्यागेन कोटिव्यया-
द्देश्यो मार्गणसञ्चयः परमहीजातोऽपि सन्तोषितः ॥१९३॥
कश्चिद्भट्टकविः कवित्वमतुलं नव्यं विधायोच्चकैः
सूरीणां पुरतोऽवदच्च भवतां स्तोत्रेण लक्षं धनम् ।
लप्स्ये मत्तमतङ्गजं यदि भवद्भक्तैकसभ्येभ्यत-
स्तर्हि श्रीगुरुनायकान् क्षितितले श्रीधर्मराजान् ब्रुवे ॥१९४॥
श्रुत्वा तद्वचनं गुरुप्रतिकृते श्राद्धः सदारङ्गकः
सान्वर्थो गजराजयुक्तमखिलं तस्मै धनं दत्तवान् ।
एवं श्रीगुरुराजहीरविजयाचार्यस्तवाधायिनः
के के तत्र महार्थपात्रमभवन्नो मार्गणाः पण्डिताः ॥१९५॥
तस्मिन् वर्षचतुष्टयं नरवरस्यासन्नदेशे स्थिताः
सूरीशा नृपपुङ्गवेन विविधोपायज्ञविज्ञैर्निजैः ।
रात्रावह्नि परीक्षिताः स्वयमपि च्छन्नं कृतश्रावका-
नेकास्तिक्यसुलक्षणेन विशदप्रज्ञेन शुद्ध्यर्थिना ॥१९६॥
शुद्धाः सर्वपरीक्षणैर्गुरुवरा ज्ञात्वेति पृथ्वीपतिः
सभ्यानां पुरतः स्वपर्षदि गुणांस्तेषां स्वधीशोऽभिवान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्त्वा सर्वयतीशहीरविजयाख्यानामदाद् भक्तितः
स्वैर्वाक्यैर्बिरुदं जगद्गुरुरिति स्पष्टं महःपूर्वकम् ॥१९७॥
सूरीणां करतोऽथ शान्तिविबुधस्वादापयत्तार्किक-
श्रेष्ठत्वादिगुणैश्चमत्कृतमनाः श्रीवाचकाग्र्यं पदम् ।
सद्यः स्थानकसिंहमुख्यसकलश्राद्धास्तदात्युत्सवं
चक्रुः श्रीमति वित्तकोटिकलिताः फत्तेपुरे सर्वतः ॥१९८॥
अन्येद्युर्नरनाथहस्तलिखितं लात्वा त्रिलोकीगुरोः
शिष्याः श्रीगुरुमान्यधन्यविजयास्तद्भृत्यसंसेविताः ।
सूरत्यादिषु मुद्गलाश्रितजिनौकःसाधुसद्मव्रजं
तन्मुक्तं जिनबिम्बसाधुकलितं श्राद्धैस्तदाऽकारयन् ॥१९९॥
एवं श्रीगुरुहीरहीरविजयाचार्यान्नृपाऽकब्बरे-
णात्यन्तं रचितस्तुतीन् कृतमहापूजान् पुनः सत्कृतान् ।
आयातानथ गौर्जरे क्षितिवले श्रुत्वा पुरान्मङ्गलात्
स्तौतीत्थं शिशुपद्मसागरकविः प्रेम्णा विवेकान्वितः ॥२००॥
नत्वा सत्त्वनिधत्तवत्त्वचरितं श्रीपार्श्वनाथं जिनं
स्तौमि श्रीनिधिमूर्त्तिहीरविजयं भट्टारकाग्रेसरम् ।
यस्य स्तोत्रधनुष्यसंख्यविदुषामासेदुषां शेमुषी-
बाणाली गुणसंस्थिताऽपि भुवने व्याप्ता न कैः श्लाघ्यते ॥२०१॥
श्लाघा ते मुनिराज ! कस्य वदने जिह्वेव नो विद्यते
विद्या साऽपि न काऽस्ति देव ! तव या जिह्वान्तमासेदुषी ।
सन्ति त्वय्यनघाः पवित्रितदिशः सम्यग्गुणाश्चापरे
मत्वेतीव समस्तगच्छजनता त्वां स्वामिनं मन्यते ॥२०२॥
सोमत्वं तव निष्कलङ्कमतुलं नित्यप्रसारैः करै-
र्मन्ये व्योम्नि समेत्य शीतकिरणो जात्यार्थिवद्याचते ।
आदित्यस्तु तव प्रतापमचलं विश्वत्रयव्यापिनं
तेन त्वत्पुरतो न कः क्षितितले सञ्जायते याचकः ॥२०३॥
सूर्याचन्द्रमसौ गुणान्तममलं ते वीक्षितुं नायक !
स्रष्ट्रा व्योमतलाध्वशीघ्रतरगौ दूताविव प्रेषितौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्राप्येव तदन्तमम्बुधितले खिन्नोऽविशङ्कानुमान्
श्यामास्यः पुनरागतः शशधरो रात्रौ कलङ्कच्छलात् ॥२०४॥
स्रष्टाऽथ स्वयमेव निर्मितगतिर्व्योम्नीव ताराच्छलात्
स्वामिंस्त्वद्‌गुणसंग्रहं निशि करोत्याक्षेपवान् सर्वदा ।
यद्यन्नाय दिवा तु निश्चलमतिर्भूत्वेव तिग्मच्छवि-
स्तिष्ठत्येष यतः सतां मतिरियं सद्वस्तुनः पालने ॥ २०५ ॥
मूर्त्तिस्ते जिनमूर्त्तिवत्कलियुगे दुष्कल्मषध्वंसिनी
शान्तैः कान्तमनोभिरीहिताहितैश्चित्ते निजे न्यस्यते ।
दुष्टैः कैश्चिदुपेक्ष्यतेऽथ तव न द्वेषो न चोल्लासिता
शीतांशोरमृते दुरम्बुनि समः किं नो भवेत्सङ्क्रमः? ॥२०६॥
देव ! त्वद्‌गुणसन्ततिर्गुणिजनैर्न्यस्ता निजे मानसे
चित्रावल्लिरिव प्रवृद्धिजनिकाऽभूत्तद्‌गुणानां जने ।
दोषाक्तैरथ दूरिताऽद्भुतमिदं तद्दोषसंवर्द्धिनी
यद्वा नाऽद्भुतमेतदुग्रमनसामुग्रा प्रवृत्तिर्भवेत् ॥२०७॥
श्रीवीरस्य शिवङ्गतस्य विरहे दुःखार्दितप्राणिनां
दुःखध्वंसकृते कलाविव विधिस्तत्तुल्यहीरं व्यधात् ।
तस्यैवास्य भवेद्यदीयहृदयेऽभेदप्रतीतिः परा
श्रेयःश्रीः करपङ्कजे स्थितवती कुर्याच्च तं तन्निभम् ॥२०८॥
स्वस्त्यऽर्काय तमोभिदे भगवते लोकप्रकाशात्मने
विश्वायाघनदानतो ह्यवसरे वृत्तिं परां तन्वते ।
जाड्यच्छेदपराय दूरगजनोत्तापाय शस्तोदये
भूदेवैर्विहितार्चनाय भवते भूयात् स्फुरद्रोचिषे ॥ २०९ ॥
लोकोन्मार्गनिदर्शनोद्भवमिव स्वागः स्मरन् लौकिकः
शम्भुस्त्वय्युदिते श्रुते मुनिपते ! नश्यन् सुनीत्यद्भुते ।
भारं मूर्द्ध्नि विमृश्य शीतकिरणं यं पुष्करे मुक्तवान्
सोऽयं प्रभ्रमतीव सार्थपतिना मुक्तो गलिर्गौः पथे ॥ २१० ॥
कुर्वाणस्तव दर्शनं नयनयोर्लोकोऽनिमेषोऽभवत्
त्वद्भाषाश्रवणाद्विवेकविकलोऽप्यासीद्विवेकान्वितः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वत्पादाब्जनमस्कृतेर्मुनिपते ! निःस्वोऽपि सस्वोऽभव-
न्माहात्म्यं ननु कस्य मानसमिदं नो रञ्जयत्यद्भुतम् ॥२११॥

व्याप्तस्य प्रकटं त्रिलोकमपि ते स्वामिन् ! प्रतापोज्ज्वल-
द्वह्नेर्व्योम्नि गतेषु तारकमिषात्तारं स्फुलिङ्गेष्वहो ।
मन्ये दाहभयेन रात्रिसमये नोदेति भासांपति-
र्वीरोऽप्युत्कटशक्तिमत्यपबलोऽदृश्यो भवेदागते ॥ २१२ ॥

मत्वैकं सुभटं त्रिलोकविकटं श्रीनन्दनं भस्मसा-
च्चक्रे ते मुनिराट् ! प्रतापहुतभुग् दुःसाध्यतेजा असौ ।
तस्मादप्यधिकस्य नेत्रकपटाद्भालं स्वयं भिन्नवान्
गौरीशस्य ततस्त्रिलोचनतयैवाख्याऽभवद्भूतले ॥२१३॥

ये श्रीवीरजिनेन्द्रशासनमिदं विस्तारयन्तः क्षिता-
वंभोदा इव दुग्धसिन्धुसलिलं प्राप्तास्ततोऽप्युन्नतिम् ।
केषां नो रुचये भवन्ति गुरुताश्रद्धानपूतात्मनां
कामं काङ्क्षितदर्शना घनजनैर्जातप्रभावाः कलौ ॥२१४॥

यान्नूनं प्रणमन्ति मानवगणाः सम्यग्गुरुत्वाशया-
निर्णीयाऽपरगच्छनायकगणे सम्यग्गुरुत्वक्षयम् ।
प्रत्यूषे शशलाञ्छनादिनिकरे दृष्ट्वा प्रकाशक्षयं
मार्त्तण्डं किमु नार्चयन्ति दिवसाधीशत्वसम्भावनात् ॥२१५॥

यैश्चक्रे कृतिनां मतिः शुभतरा श्रद्धानपूतात्मनां
श्रीमद्वीरजिनेन्द्रशासनतरोर्भास्वत्फलास्वादने ।
उच्छेद्यापरतीर्थमोहमदनद्रून्मादनिष्णाततां
यद्वैद्यान्निपुणान्न कः प्रकुरुते पथ्यादनं शुद्धधीः ॥ २१६ ॥

येभ्योऽयं गुणिपूरितस्तपगणः प्राप्नोत्युदग्रं यश-
स्तेजोजात्यमणेर्यतोऽधिकतरं हारोऽपि मुक्तान्वितः ।
येभ्यश्चेह परत्र मङ्गलधिया के के नमस्यन्ति न
प्राप्तं केन यतोऽमृतं क्षितितले नास्वाद्यते धीमता ॥२१७॥

येभ्यो नश्यति शासनं हरिहरब्रह्मादिदेवोदितं
ध्वान्तं तिग्मकरादिवाधिकतमं रात्रिप्रभावोदितम् ।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

येऽभ्यत्रापि चकास्ति शासनमिदं स्याद्वादवादाङ्कितं
व्योमेवोष्णकरान् मनुष्यनिकरावस्थानमूर्द्धस्थितम् ॥२१८॥

येषां प्राप्य पवित्रदाक्षिणकरस्पर्शं निजे मस्तके
जायन्तेऽतिनिकृष्टवृत्तय इमेऽप्युत्कृष्टशिष्टश्रियः ।
स्वर्णत्वं किमु नाश्रयन्ति भुवने लोहानि योगीशितु-
र्लब्ध्वा शुद्धरसान्वयं यत इह स्याद्रङ्गितासङ्गतः ॥२१९॥

संक्रान्ता बत येषु निर्मलगुणाः ख्यातिं लभन्तेतरां
शीतांशोरिव चन्द्रकान्तिमणिषु ज्योत्स्नाः सुधासङ्गतिम् ।
येषु स्वामिषु सत्सु भारतमिदं विभ्राजते सर्वतः
श्रीसीमन्धरतीर्थनेतरि यथा क्षेत्रं विदेहाऽभिधम् ॥ २२० ॥

तेषां सद्वचनानि शुद्धरचनान्याकर्ण्य विद्वज्जना-
जानन्तीति कलावपीह भरते किं तीर्थनाथागमः ?।
किंवा गच्छभृदागमः परकृते क्षेत्राद्विदेहाभिधात्
स्वर्गाद्वा धिषणागमः किमथवा शुक्रागमो भूतलात् ॥२२१॥

स्वामिंस्त्वच्चरणे पतन्ति विमलात्मानो जनाः केवलं
ये ते स्युर्भुवि भूरिमूर्द्धमणयश्चित्रं समानोदयाः ।
श्रुत्वा ख्यातिमिमां तवेश ! विशदां भाग्याधिलब्धर्द्धयः
के के न भ्रमरीभवन्ति चरणाम्भोजे सदास्वादिनि ॥२२२॥

नाथ ! त्वद्वदनोपमानमनघं दत्तं कवीशैः शशी
आसाद्येव हरस्य मूर्द्ध्नि वसतिं लेभे कलाभ्युन्नतः ।
त्वद्वाणीसमतामवाप्य वसुधा मन्येऽभवन्नाकिनां
भोग्या योग्यतया हि वस्तुनि न कः स्यादुद्यतः शुद्धधीः ॥२२३॥

दृष्टं त्वद्वदनं गणेश ! गुणिनां दोषापहं सर्वदा
चान्द्रं मण्डलमन्यथेति विबुधैः किं गीयते तत्समम् ?।
एषा मे वचनीयता क्षितितले माभूदितीवैणभृ-
च्छम्भोर्मूर्द्ध्नि तपस्तनोत्यतनुकं गङ्गातटे निर्मले ॥२२४॥

पीत्वा त्वद्वचनं मनुष्यनिकरः सुस्थः समाभ्युद्भवा-
द्देवानां निकरस्तु तत्समसुधां तृप्तस्तथा चाभवत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वं त्वेवं भुवनोपकारकरणेनैवाऽसि तृप्तः सदा
त्वामेवं विबुधाः स्तुवन्ति गुणिषु प्राप्तैकरेखं समम् ॥२२५॥

त्वत्कण्ठोपमितिं मुनीश्वर ! समासाद्यैव कम्बुर्वरः
कृष्णस्याऽपि जयप्रदाननिपुणः संजायते मङ्गलम् ।
यत्रत्यां स्वरसारतां बुधजनाः पीत्वेव तृप्ता इदं
भाषन्तेऽमृतपूर्णपूर्णकलशः किं वेधसाऽयं कृतः ? ॥२२६॥

विद्याभिस्तव गच्छनाथ ! हृदयं सर्वाभिरप्याश्रितं
क्षीराम्भोधिरिवाऽमलाभिरमलं स्रोतस्विनीभिः श्रिये ।
तज्जानेऽजनि सर्वतः पृथुतरं तद्वासदानाय यत्
सन्तः स्युर्वसतिप्रदानमतयः स्वैकाश्रयप्राणिनाम् ॥२२७॥

देव ! त्वद्भुजयामलं मतिमतां दृग्मार्गमभ्यागतं
हृद्येवं विदधाति तर्कमिह किं धात्रा समर्थाविमौ ? ।
सृष्टौ मूर्द्धनि दुष्प्रहारविधये दण्डौ त्रिलोकोद्भव-
स्यानङ्गस्य महाभटस्य परमस्थाम्नाऽधिकत्वस्पृशा ॥२२८॥

त्वत्कोष्ठे जलधाविवाऽतिगहने सिद्धान्तरत्नान्यहो !
तिष्ठन्ति प्रकटानि नायक ! तथा तस्थुर्यथा निर्मले ।
श्रीसौधर्मगणेशमुख्यसकलाचार्योदरे तद्बुधा-
मत्वेतीव वदन्ति तत्तदनुगं त्वां ख्यातविद्यागुणम् ॥२२९॥

उत्सङ्गस्तव देव ! देववनितातुल्याङ्गनालिङ्गन-
त्यागी शैशवजातितोऽपि विबुधाधीशोऽस्ति मन्ये ततः ।
साधुत्वे सदृशेऽपि देववनितोत्सङ्गा वशिष्ठादिका-
लज्जातो मुनयो गताः क्वचिदहो ! निर्मानुषे कानने ॥२३०॥

देवोरुद्वयमद्भुतं तव सदारम्भाफलाभ्यन्तर-
स्पर्शं नैव कदाचिदद्भुततरं पस्पर्श नारीतलम् ।
मत्वेतीव सुवृत्तजानुमिषतः सद्वृत्तकोशं न्यधा-
द्धाता तत्र ततस्तपोगणपते ! सद्वृत्तता ते मता ॥२३१॥

देव ! त्वच्चरणौ सुरासुरनराधीशप्रणामोचितौ
मत्वेतीव विधिश्चकार विशदच्छत्रादिचिह्नाङ्कितौ ।

सर्वोर्द्धार्थविशेषसंगमवशात्तत्रोर्द्धरेखां व्यधा–
देवं त्वां स्तवनं नयन्ति विबुधाः श्रीहीरभट्टारक ! ॥२३२॥

मङ्गलाख्ये पुरे मोदादेवं काव्यं जगद्गुरोः ।
चकार सर्वसिद्ध्यर्थं पण्डितः पद्मसागरः ॥ २३३ ॥

इति महोपाध्यायश्रीधर्मसागरगणिपण्डितोत्तंसपं-श्रीविमलसागर-
गणिशिष्यपं-पद्मसागरगणिविरचितं जगद्गुरुकाव्यं संपूर्णम् ।

लिखितं मङ्गलपुरे संवत् १६४६ वर्षे द्वितीयभाद्रपदासित ११ दिने ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ॥ प्रस्तावना ॥

अस्य खण्डकाव्यस्य कर्त्तारः श्रीपद्मसागरगणयः सुप्रतीता एव जैनानाम् । एतेषां सत्तासमयो जगद्गुरुश्रीहीरविजयसूरिसमान एवेत्यस्यैव काव्यस्य समूलचूलमालोकनतः,

"चक्रे शास्त्रमिदं यत्नात् त्र्यग्निषट्चन्द्रवत्सरे ।
पद्मसागरसंज्ञेन बुधेन स्वात्मबुद्धये" ॥ ४ ॥

इत्येतैरेव विक्रमात् १६३३ संवत्सरे विरचितस्य स्वोपज्ञटीकासहितस्य श्रीनयप्रकाशाष्टकस्यान्तिमभागतश्च निःसन्दिग्धं व्यक्तीभवति ।

एभिर्ग्रन्थकर्तृभिः अन्येऽपि शीलप्रकाश–युक्तिप्रकाश–तट्टीका–श्रीउत्तराध्ययनकथासंग्रहाद्योऽनेके ग्रन्था निरमायिषत । यैर्न्यायसाहित्यादिविषयेषु तेषां अपूर्वा प्रतिभाशालिता स्पष्टमाविर्भवति ।

काव्यस्यैतस्य नायकानां श्रीहीरविजयसूरीणां इतिहासोपयोगि अधिकं वृत्तान्तं पाठकानामावश्यकं मत्वा महोपाध्यायश्रीधर्मसागरगणिनिर्मिततपागच्छपट्टावलीतोऽत्रोद्ध्रियते—

" श्रीविजयदानसूरिपट्टेऽष्टपञ्चाशत्तमाः श्रीहीरविजयसूरयः । किंविशिष्टाः संप्रति तपागच्छे आदित्यसदृशास्तदुद्द्योतकत्वात् । तेषां विक्रमतः त्र्यशीत्यधिके पञ्चदशशतवर्षे १५८३ मार्गशीर्षशुक्लनवमीदिने प्रह्लादनपुरवास्तव्य–ऊकेशज्ञातीयसा–कुंराभार्यानाथीगृहे जन्म । षण्णवत्यऽधिके १५९६ कार्त्तिकबहुलद्वितीयायां २ पत्तननगरे दीक्षा । सप्ताऽधिके षोडशशतवर्षे १६०७ नारदपुर्यां श्रीऋषभदेवप्रासादे पण्डितपदम् । अष्टाधिके १६०८ माघशुक्लपञ्चमीदिने नारदपुर्यां श्रीवरकाणकपार्श्वनाथसनाथे श्रीनेमिनाथप्रासादे वाचकपदम् । दशाधिके १६१० सीरोहीनगरे सूरिपदम् । तथा येषां सौभाग्यवैराग्यनिःस्पृहतादिगुणश्रेणेरेकमपि गुणं वचोगोचरीकर्तुं वाचस्पतिरप्यचतुरः । तथा स्तम्भतीर्थे येषु स्थितेषु तत्रत्यश्रद्धालुभिः टङ्ककानामेका कोटिः प्रभावनादिभिर्व्ययीकृता । येषां चरणविन्यासे प्रतिपदं सुवर्णटङ्करूप्यनाणकमोचनं, पुरतश्च मुक्ताफलादिभिः स्वस्तिकरचनं, प्रायस्तदुपरि च रौप्यकनाणकमोचनं चेत्यादि संप्रत्यऽपि प्रत्यक्षसिद्धम् । यैश्च सीरोह्यां श्रीकुन्थुनाथबिम्बानां प्रतिष्ठा कृता । तथा नारदपुर्यामनेकानि जिनबिम्बानि प्रतिष्ठितानि । तथा स्तम्भतीर्थाऽहम्मदावादपत्तननगरादौ अनेकटङ्कलक्षव्ययप्रकृष्टाभिरनेकाभिः प्रतिष्ठाभिः सहस्रशो बिम्बानि प्रतिष्ठितानि । येषां च विहारादौ युगप्रधानसमानाऽतिशयाः प्रत्यक्षसिद्धा एव । तथाऽहम्मदावादनगरे लुङ्कामता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽधिपतिः ऋषिमेघजीनामा स्वकीयमताऽऽधिपत्यं दुर्गतिहेतुरिति मत्वा रज इव परित्यज्य पञ्चविंशतिमुनिभिः सह सकलराजाधिराजपातिसाहिश्रीअकब्बरराजाज्ञापूर्वकं तदीयाऽऽतोद्यवादनादिना महामहपुरस्सरं प्रव्रज्य यदीयपादाम्भोजसेवापरायणो जातः । एतादृशं च न कस्याप्याचार्यस्य श्रुतपूर्वम् । किञ्च । येषामशेषसंविग्नसूरिशेखराणामुपदेशात् सहस्रशो गजानां, लक्षशो वाजिनां, गूर्जर-मालव-विहार—अयोध्या—प्रयाग—फतेपुर—दिल्ली—लाहुर-मुलतान—क्याबिल—अजमेर-बङ्गालाद्यभिधानानामनेकदेशसमुदायात्मकानां द्वादशसूबानां चाधीश्वरो महाराजाधिराजशिरःशेखरः पातिसाहिश्रीअकब्बरनरपतिः स्वकीयाऽखिलदेशेषु षाण्मासिकामारिप्रवर्त्तनं जीजीयाऽभिधानकरमोचनं च विधाय सकललोकेषु जाग्रत्प्रभावभवनं श्रीमज्जिनशासनं जनितवान् । तद्व्यतिकरो विस्तरतः श्रीहीरसौभाग्यकाव्यादिभ्योऽवसेयः । समासतस्त्वेवम्—एकदा कदाचित्प्रधानपुरुषाणां मुखवार्त्तया श्रीमद्गुरूणां निरुपमशमदमसंवेगवैराग्यादिगुणगणश्रवणतश्चमत्कृतचेतसा पातिसाहिश्रीअकब्बरेण स्वनामाङ्कितं फुरमानं प्रेष्याऽतिबहुमानपुरस्सरं गन्धारबन्दिरात् दिल्लीदेशे आगराख्यनगरासन्नश्रीफतेपुरनगरे दर्शनकृते समाकारिताः सन्तोऽनेकभव्यजनक्षेत्रेषु बोधिबीजं वपन्तः श्रीगुरवः क्रमेण विहारं कुर्वाणाः विक्रमत एकोनचत्वारिंशदधिकषोडशशतवर्षे १६३९ ज्येष्ठबहुलत्रयोदशीदिने तत्र संप्राप्ताः । तदानीमेव च तदीयप्रधानशिरोमणिशेषश्रीअबलफजलाख्यद्वारा उपाध्यायश्रीविमलहर्षगणिप्रभृत्यनेकमुनिनिकरपरिकरिताः श्रीसाहिना समं मिलिताः । तदवसरे च श्रीमत्साहिना सादरं स्वागतादि पृष्ट्वा, स्वकीयास्थानमण्डपे समुपवेश्य च परमेश्वरस्वरूपं, धर्मस्वरूपं च कीदृशं कथं च परमेश्वरः प्राप्यत इत्यादिधर्मगोचरो विचारः प्रष्टुमारेभे । तदनु श्रीगुरुभिरमृतमधुरया गिराऽष्टादशदोषविधुरपरमेश्वरपञ्चमहाव्रतस्वरूपानिरूपणादिना तथा धर्मोपदेशो ददे यथा आगरादृक्तोऽजमेरनगरं यावदध्वनि प्रतिक्रोशं कूपिकोपेतमनारान्विधाय स्वकीयाखेटककलाकुशलताप्रकटनकृते प्रतिमनारं शतशो हरिणविषाणारोपणविधानादिना प्राग् हिंसादिकरणरतिरपि स भूपतिर्दयादानयतिसङ्गतिकरणादिप्रवणमतिः सञ्जातः । ततोऽतीवसन्तुष्टमनसा श्रीसाहिना प्रोक्तम् । यत् पुत्रकलत्रधनस्वजनदेहादिषु निरीहेभ्यः श्रीमद्भ्यो हिरण्यादिदानं न युक्तिमत् । अतो यदस्मदीयमन्दिरे पुरातनं जैनसिद्धान्तादिपुस्तकं समस्ति, तल्लात्वाऽस्माकमनुग्रहो विधेयः । पश्चात् पुनः पुनराग्रहवशात् तत्समादाय श्रीगुरुभिः आगराख्यनगरे चित्कोशतयाऽमोचि । तत्र साधिकप्रहरं यावद्धर्मगोष्ठीं विधाय श्रीमत्साहिना समनुज्ञाताः श्रीगुरवो महताडम्बरेण उपाश्रये समाजग्मुः । ततः सकलेऽपि लोके प्रवचनोन्नतिः स्फीतिमती सञ्जाता । तस्मिन् वर्षे आगराख्यनगरे चतुर्मासककरणानन्तरं सौरीपुरे श्रीनेमिजिनयात्राकृते समागतैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीगुरुभिः पुरातनयोः श्रीऋषभदेवश्रीनेमिनाथसम्बन्धिन्योर्महत्योः प्रतिमयोः, तदानीमेव निर्मितश्रीनेमिजिनपादुकायाश्च प्रतिष्ठा कृता। तदनु आगराख्यनगरे सा–मानसिंहकल्याणमल्लकारितश्रीचिन्तामणिपार्श्वनाथादिबिम्बानां प्रतिष्ठा शतशः सुवर्णटङ्कव्ययादिना महामहेन निर्मिता। तत्तीर्थं च प्रथितप्रभावं सञ्जातमस्ति। ततः श्रीगुरवः पुनरपि फतेपुरनगरे समागत्य श्रीसाहिना सार्कं मिलिताः। तदवसरे च प्रहरं यावद्धर्मप्रवृत्तिकरणानन्तरं श्रीसाहिरवदत् यत् श्रीमन्तो मया दर्शनोत्कण्ठितेन दूरदेशादाकारिताः। अस्मदीयं च न किमपि गृह्यते। तेनास्मत्सकाशात् श्रीमद्भिः सचित्तं याचनीयं येन वयं कृतार्था भवामः। तत् सम्यग्विचार्य श्रीगुरुभिस्तदीयाखिलदेशेषु पर्युषणापर्वसत्काष्टाह्निकायाममारिप्रवर्त्तनं बन्दिजनमोचनं चायाचि। ततो निर्लोभताशान्ततायतिशयितगुणगणातिचमत्कृतचेतसा श्रीसाहिना अस्मदीयान्यपि चत्वारि दिनानि समधिकानि भवन्त्विति कथयित्वा स्ववशीकृतदेशेषु श्रावणबहुलदशमीतः प्रारभ्य भाद्रपदशुक्लषष्ठीं यावदमारिप्रवर्त्तनाय द्वादशदिनामारिसत्कानि काञ्चनरचनाञ्चितानि स्वनामाङ्कितानि षट् फुरमानानि त्वरितमेव श्रीगुरूणां समर्पितानि। तेषां व्यक्तिः प्रथमं गूर्जरदेशीयं, द्वितीयं मालवदेशसत्कं, तृतीयं अजमेरदेशीयं, चतुर्थं दिल्लीफत्तेपुरदेशसम्बन्धि, पञ्चमं लाहुरमुलतानमण्डलसत्कम्, श्रीगुरूणां पार्श्वे रक्षणाय षष्ठं देशपञ्चकसंबन्धि साधारणं चेति। तेषां च तत्तद्देशेषु प्रेषणेनामारिपटहोद्घोषणवारिणा सिक्ता सती पुराऽज्ञायमाननामाऽपि कृपावल्ली सर्वत्रार्यानार्यकुलमण्डपेषु विस्तारवती बभूव। तथा बन्दिजनमोचनस्याप्यङ्गीकारपुरस्सरं श्रीसाहिना श्रीगुरूणां पार्श्वादुत्थाय तदैवानेकगव्यूतामिते डाबरनाम्नि महासरसि गत्वा साधुसमक्षं स्वहस्तेन नानाजातीयानां देशान्तरीयजनप्राभृतीकृतानां पक्षिणां मोचनं चक्रे। तथा प्रभाते कारागारस्थबहुजनानां बन्धनभञ्जनमप्यकारि। एवमनेकशः श्रीमत्साहेर्मिलनेन श्रीगुरूणां धरित्रीमरुमण्डलादिषु श्रीजिनप्रासादोपाश्रयाणामुपद्रवनिवारणायानेकफुरमानविधापनादिना प्रवचनप्रभावनादिप्रभावो यो लाभोऽभवत् स केन वर्णयितुं शक्यते ?। तदवसरे च संजातगुरुतरगुरुभक्तिरागेण मेडतीयसा—सदारङ्गेण मार्गणगणेभ्यो मूर्त्तिमद्गजदानद्विपशदऽश्वदानलक्षप्रासादविधानादिना, दिल्लीदेशे श्राद्धानां प्रतिगृहं सेरद्वयप्रमाणखण्डलम्भनिकानिर्माणादिना च श्रीजिनशासनोन्नतिश्चक्रे। तथैका प्रतिष्ठा सा–थानसिंघकारिता। अपरा च सा–दूजणमल्लकारिता श्रीफतेपुरनगरेऽनेकटङ्कलक्षव्ययादिना महामहोत्सवोपेता विहिता। किञ्च। प्रथमचतुर्मासकमागराख्यद्रङ्गे, द्वितीयं फतेपुरे, तृतीयमभिरामाबादे, चतुर्थं पुनरप्यागराख्ये चेति चतुर्मासीचतुष्टयं तत्र देशे कृत्वा गूर्जरदेशस्थश्रीविजयसेनप्रभृतिसंघस्याऽऽग्रहवशात् श्रीगुरुचरणा धरित्रीपवित्रीकरणप्रवणान्तःकरणाः श्रीशेखूजी-श्रीपाहूजी-श्रीदानीआराभिधपुत्रादिप्रवरपरिकराणां श्रीमत्साहिपुरन्दराणां पार्श्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फुरमानादिकार्यकरणतत्परानुपाध्यायश्रीशान्तिचन्द्रगणिवरान् मुक्त्वा मेडतादिमार्गे विहारं कुर्वाणा नागपुरे चतुर्मासीं विधाय क्रमेण सीरोहीनगरे समागताः। तत्रापि नवीनचतुर्मुखप्रासादे श्रीआदिनाथादिबिम्बानां, श्रीअजितजिनप्रासादे श्रीअजितजिनादिबिम्बानां च क्रमेण प्रतिष्ठाद्वयं विधाय अर्बुदाचले यात्रार्थं प्रस्थिताः। तत्र विधिना यात्रां विधाय यावद्धरित्रीदिशि पादावधारणं विदधति तावत् महारायश्रीसुलतानजीकेन सीरोहीदेशे पुरा करातिपीडितस्य लोकस्य अथ पीडां न विधास्यामि, मारिनिवारणं च करिष्यामीत्यादिविज्ञप्तिं स्वप्रधानपुरुषमुखेन विधाय श्रीगुरवः सीरोह्यां चतुर्मासीकरणायात्याग्रहात् समाकारिताः। पश्चात् तद्राजोपरोधेन, तद्देशीयलोकानुकम्पया च तत्र चतुर्मासीं विधाय क्रमेण रोहसरोतरामार्गे विहारं कुर्वन्तः श्रीपत्तननगरं पावितवन्तः। अथ पुरा श्रीसूरिराजैः श्रीसाहिहृदयालवालारोपिता कृपालतोपाध्यायश्रीशान्तिचन्द्रगणिभिः स्वोपज्ञकृपारसकोशाख्यशास्त्रश्रावणजलेन सिक्ता सती वृद्धिमती बभूव। तदभिज्ञानं च श्रीमत्साहिजन्मसम्बन्धी मासः, श्रीपर्युषणापर्वसत्कानि द्वादश दिनानि, सर्वेऽपि रविवाराः, सर्वसंक्रान्तितिथयः, नवरोजसत्को मासः, सर्वे ईदीवासराः, सर्वे मिहरवासराः, सोफीआनवासराश्चेति षाण्मासिकामारिसत्कं फुरमानं, जीजीआभिधानकरमोचनसत्कानि फुरमानानि च श्रीमत्साहिपार्श्वात्समानीय धरित्रीदेशे श्रीगुरूणां प्राभृतीकृतानीति। एतच्च सर्वजनप्रतीतमेव। तत्र नवरोजादिवासराणां व्यक्तिस्तत्फुरमानतोऽवसेया। किञ्च। अस्मिन् दिल्लीदेशविहारे श्रीमद्गुरूणां श्रीमत्साहिप्रदत्तबहुमानतः निष्प्रतिमरूपादिगुणगणानां श्रवणवीक्षणतश्चानेकम्लेच्छादिजातीया अपि सद्यो मद्यमांसाशनजीवहिंसनादिरतिं परित्यज्य सद्धर्मकर्मासक्तमतयः, तथा केचन प्रवचनप्रत्यनीका अपि निर्भरभक्तिरतयः, अन्यपक्षीया अपि कक्षीकृतसद्भूतोद्भूतगुणततयश्चासन्। इत्याद्यनेकेऽवदाताः षड्दर्शनप्रतीता एव। तथा श्रीपत्तननगरे चतुर्मासककरणादनु विक्रमतः षट्चत्वारिंशदधिकषोडशशत १६४६ वर्षे स्तम्भतीर्थे सो-तेजपालकारिता सहस्रशो रूप्यकव्ययादिनाऽतीव श्रेष्ठां प्रतिष्ठां विधाय श्रीजिनशासनोन्नतिं तन्वानाः श्रीसूरिराजो विजयन्ते"

अस्यैकैव प्रतिः अणहिल्लपुरपत्तनस्य ( पाटन ) "फोफलीयावाडा आगलीशेरी" इत्यस्य भाण्डागारात् श्रेष्ठिश्रीभोगीलाल-हालाभाई-द्वारोपलब्धा। अतोऽत्र स्थले तस्य श्रेष्ठिनो धन्यवादपुरस्सरं उपकारं मन्यावहे।

तदेवमेकस्यैव पुस्तकस्याधारेण शोधितमुद्रितेऽप्यस्मिन् ग्रन्थे जाताः स्खलनाः सहृदयाः कृपां विधाय शोधयिष्यन्तीति—

निवेदयतौ—

**हरगोविन्द—बेचरदासौ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

।।। नमो नमः श्री गुरुप्रेमसूरये ।।

श्रीसोमचारित्रगणिविरचितं

# गुरुगुणरत्नाकरकाव्यम् ।

शास्त्रविशारदजैनाचार्यश्रीविजयधर्मसूरि
चरणान्तेवासिना मुनिश्री इन्द्रविजयेन संशोधितम् ।

**प्रकाशक**

श्री जिनशासन आराधना ट्रस्ट
दुकान नं.५, बद्रिकेश्वर सोसायटी,
८२, नेताजी सुभाष मार्ग, 'ई' रोड,
मरीन ड्राईव, मुंबई - ४०० ००२

वि. सं. २०५६
मूल्य रु. ३०/-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## પ્રાપ્તિ સ્થાન

● **શ્રી જિનશાસન આરાધના ટ્રસ્ટ**
શોપ નં. ૫, બદ્રિકેશ્વર સોસાયટી,
મરીન ડ્રાઇવ, 'ઇ' રોડ, નેતાજી સુભાષ માર્ગ,
મુંબઇ-૪૦૦ ૦૦૨.

● **શ્રી જિન શાસન આરાધના ટ્રસ્ટ**
C/o. ચંદ્રકાંત એસ. સંઘવી,
બી/૬, અશોકા કોમ્પલેક્ષ, રેલ્વે ગરનાળા પાસે,
પાટણ (ઉ. ગુજ.), પીન-૩૮૪ ૨૬૫.

● **મૂળીબહેન અંબાલાલ રતનચંદ જેન ધર્મશાળા,**
સ્ટેશન રોડ, વીરમગામ, (ગુજરાત).

● **બંસીલાલ અંબાલાલ શાહ જેન યાત્રિક ભુવન**
માણેક ચોક, ખંભાત (ગુજરાત), પીન-૩૮૮ ૬૨૦

● **ચીમનલાલ કલાધર**
સંતકૃપા, બીજે માળે, મ્હસકરવાડા, છેડા રોડ,
જોશી હાઇસ્કુલ પાસે, ડોંબીવલી (પૂર્વ), પીન-૪૨૧ ૨૦૧.
જિ. થાણા (મહારાષ્ટ્ર)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# પ્રકાશકીય

પ્રસ્તુત શ્રી "ગુરુ ગુણ રત્નાકર કાવ્યમ્" માં પૂજયપાદ આચાર્યદેવ શ્રી રત્નશેખરસૂરિ મ.સા.ના પટ્ટધર શ્રી લક્ષ્મીસાગરસૂરિ મ.સા.ના ગુણોનું વર્ણન કરવામાં આવેલ છે. ગ્રંથના રચયિતા છે આચાર્ય શ્રી સોમસુંદરસૂરિ મ.સા.ના પટ્ટધર આચાર્ય શ્રી સોમદેવસૂરિના શિષ્ય પંડિત ચારિત્રહંસવિજયજીના વિનેયસોમચારિત્ર ગણિ. સંવત ૧૫૪૧ની સાલમાં આ કાવ્યની રચના થયેલ છે. આ કાવ્યનું સંશોધન શાસ્ત્રવિશારદ આ. ધર્મસૂરિ મ.સા. ના શિષ્ય મુનિ શ્રી ઈંદ્રવિજય મ.સા.એ કરેલ છે અને તેને વિ.સં.૨૪૩૭માં ભૂરાભાઈના પૂત્ર હર્ષચંદ્રે મુદ્રિત કરી શ્રી યશોવિજયજી ગ્રંથમાળાના (૨૪)માં મણકા તરીકે પ્રકાશિત કરેલ છે. પુનઃ પ્રકાશન પ્રસંગે સંશોધક મુનિ ભગવંતના ઉપકારને યાદ કરવા સાથે પ્રકાશક પ્રત્યે કૃતજ્ઞતાના ભાવને પ્રદર્શિત કરીએ છીએ.

પ્રાન્તે આ ગ્રંથના સ્વાધ્યાયથી સમ્યગ્દર્શનને સહુ કોઈ નિર્મળ કરી શીઘ્ર મુક્તિને પામે એ જ શુભેચ્છા.

પ્રાચીન ગ્રંથોના વિશેષ પ્રકાશનનો, લેખનનો લાભ મળતો રહે એ જ એકમાત્ર શુભેચ્છા.

લી. શ્રી જિનશાસન આરાધના ટ્રસ્ટ

## -: ટ્રસ્ટીઓ :-

(૧) ચંદ્રકુમાર બાબુભાઈ જરીવાલા
(૨) લલીતભાઈ રતનચંદ કોઠારી
(૩) નવીનચંદ્ર ભગવાનદાસ શાહ
(૪) પુંડરિકભાઈ અંબાલાલ શાહ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ભાવભરી અનુમોદના



પ્રસ્તુત "ગુરુ ગુણ રત્નાકર કાવ્યમ્" ના પ્રકાશનનો સંપૂર્ણ લાભ પ.પૂ. વર્ધમાન તપોનિધિ, ન્યાય વિશારદ આચાર્ય ભગવંત શ્રીમદ્ વિજય ભુવનભાનુસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પં. શ્રી ગુણસુંદરવિજયજી ગણિવર્ય ના ઉપદેશથી શ્રી જૈન શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘ, નંદરબાર તરફથી જ્ઞાનનિધિમાંથી લેવામાં આવેલ છે.

શ્રુતભક્તિના તેમના આ કાર્યની ભૂરિ ભૂરિ અનુમોદના કરીએ છીએ.

લિ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# उपोद्घातः ।

अस्मिन् लघीयस्यपि वरीयसि निम्नाभिधेयनिरूपणप्रवणे चारुतरचरितचर्चेऽन्वर्थामभिधां दधति गुरुगुणरत्नाकराख्ये कविकर्मणि श्रीरत्नशेखरसूरिपट्टधराणां श्रीलक्ष्मीसागरसूरीणां कतिपयगुणगणवर्णनं श्रीसोमचारित्रगणिना व्यधायि, इति समुत्पद्यते जिज्ञासाऽवसरः--क इम एतेषां चारित्रनिरूपयितारः ?, कदा कतमस्मिन् जनपदे च किमर्थमिदमारब्धम् ?, इति ।

तत्र स्वयमेते प्रतिसर्गान्ते समुट्टङ्कयन्ति चैवम्--

" श्रीमन्मालवमेदिनीन्दुवदनालङ्कारहारप्रभो-
ऽप्यामाऽऽगरवासिकर्मतनयश्रीरत्नसङ्घप्रभोः ।
आक्षेपाद् विधुवेदवर्म्मवसुधा १५४१ वर्षे सुभिक्षोद्भवे
लक्ष्मीसागरसूरिराजविलसद्भाग्यप्रकर्षस्तवे ॥ १ ॥
श्रीजम्बूसमसोमसुन्दरगुरोः श्रीसोमदेवाह्वयः
शिष्यः सूरिवरश्च शिष्य-वृषभश्चारित्रहंसोऽस्य यः ।
तस्य श्रीविबुधस्य शिष्यशिशुना काव्ये मुदा निर्मिते" इत्यादि ।

एतच्छ्लोकद्वयादुत्तानमेव जिज्ञासासार्थः प्रशाम्यति ।

तथा--

"पूज्याऽऽराध्यध्येयतमश्रीगच्छाधिराजभट्टारकपुरन्दरश्रीसोमसुन्दरसूरिशिष्यशिरोऽवतंसकसकलकर्णपुरुषश्रेणीप्रणीतपदपद्मसेवभट्टारकप्रभुश्रीसोमदेवसूरिशिष्यशिरोमणिपूज्याऽऽराध्य पं० चारित्रहंसगणिपादविनेयपरमाणुना सोमचारित्रगणिना विरचितो ग्रन्थः सम्पूर्णः" ।

इति प्रान्तलेखाच्च सर्वं स्फीतमेव प्रतिभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतस्मिन् ग्रन्थपरिशोधनकर्मणि पुस्तकत्रयसाहाय्यमासादितम्, तत्र—

१–२ पुस्तकद्वयं पूनाराजकीयविद्याऽऽलय (डक्कनकॉलेज) सकाशादधिगतम् ।

३ तृतीयं चाहमदाबादनिवासिना प्रेमचन्द्रात्मजकेशवलालेन प्रहितमिति ।

एतत्परिशोधने यथाशक्ति प्रयतमानोऽपि दृष्टिदोषशीशकाक्षरयोजकयोजनाऽऽदिना संभवति स्खलने भवद्भिस्तत् प्रमार्जनीयम्—

इत्याशास्ते—

आचार्योपासक—

इन्द्रविजयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम्

श्रीविजयधर्मसूरिभ्यो नमः ।

श्रीसोमचारित्रगणिविरचितं

# गुरुगुणरत्नाकरकाव्यम् ।

श्रेयःश्रीधर्मबीजं विमलमतिबृहद्भारतक्षेत्रधात्र्यां
येनोप्तं यद् युगादौ तदनु निजलसद्बोररसैः सिक्तमेतत् ।
प्रौढिं च प्रापि तज्ज्ञैः सुकृतगुरुगणैः स्वाऽऽश्रितेऽद्यापि दद्या-
दाधिव्याधिव्यपायं परमसुखफलं नाभिभूः स्तात् स सिद्ध्यै ॥१॥

स्वामिन् ! शीर्षे ममर्क्षे मृगशिरसि समस्त्यक्षियुग्मं मृगाक्ष्या-
मेणाङ्के मेऽङ्कमास्ते तदनु मृगमदे नाभिरेतच्चतुष्कम् ।
प्राणेष्टं प्रापयैभ्यः किमिति कृतकृपं प्राक्कपोताऽऽवकं यं
विज्ञीप्सुर्लक्ष्मलक्षाद् मृग इह भजते शान्तये स्तात् स शान्तिः ॥२॥

आबालब्रह्मचारी मधुररवकलापीनगत्यद्भुताङ्गः
स्वामी सानन्तशक्तिः परमहितहरो-रागमानास्यहृद्यः ।
युक्तं ख्यातः शिवाङ्गोद्भव इह कुतुकं तच्च यच्छम्भुनाथः
श्रीनेमिः शाश्वतं वः सृजतु सुखमसौ सन्नमद्दानवारिः ॥३॥

दृष्ट्वा यत्कायभासा समवसृतिरसां सर्वतो नीलवर्णा-
मर्वाणः सप्त भानोरिह हरितयवक्षेत्रविभ्रान्तिभाजः ।
साक्षात् तद्रक्षणाय स्फुटकपटधरा यद्वचोऽम्भश्च पातुं
प्रापुः पायात् स पार्श्वप्रभुरभिनमतोऽभीष्टभर्तृप्रभावः ॥४॥

भानीवाऽऽभान्ति यस्मिन् मुनिनयनमिता धर्मचारित्रभेदा-
स्तत्त्वान्युद्यद्ग्रहा वा नव तरणिमिता राशयश्च व्रतानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताराराज्यश्च सूरिप्रभृतिकृतिगुणा यत्त्वसंख्यर्षिं चित्रं
ज्योतिश्चक्रायते तत् प्रवचनमनघं यस्य वीरः श्रिये सः ॥५॥
सौपर्णेयोपमां ये निदधति विनतानन्दना विश्वरूपा-
ऽऽशाराक्राऽधःकृताष्टापदनगवसवः स्वामिनः सत्कवीनाम् ।
न-व्या-धामेहमेधाविधुतबहुविधाऽधर्मकर्मद्विजिह्वाः
सर्वे सार्वाः श्रितानां ददतु दिततमःशर्मधर्मप्रकाशम् ॥६॥
स्वोद्यत्पादैस्तदाऽष्टापदजिदपि किलाऽष्टापदं यः पवित्री-
चक्रे तैर्ज्ञानमात्मन्यसदपि च ददौ केवलं तापसेभ्यः ।
योगीन्द्रैरुज्ज्वलान्तःकरणसरसिजध्येयसन्नामधेयः
श्रीलब्ध्यम्भोधिराशाः सफलयतु स वः श्रीगुरुर्गौतमाह्वः ॥७॥
स्तुत्या येऽमर्त्यतल्या बलविजयपरा नाऽकभाजः सुधर्मोऽ-
लङ्कारा गौरवर्णा वरविभवसुधाभुक्सभाऽऽप्रभुत्वाः ।
इन्द्रायन्ते कवीन्द्राः किल सततममी भूभृतो रञ्जयन्तो
यस्याः सान्निध्यतः सा कलयतु कविताकौशलं शारदा मे ॥८॥

( स्रग्धराच्छन्दोनिबद्धं नमस्कारकाव्याष्टकम् )

चेतस्कामितमातनोति कृतिनां यत् स्मर्यमाणं यतः
स्युर्देशेष्वखिलेष्वमी मुनिवरा मान्या यदादानतः ।
तन्नामाऽपि ततः सुरद्रुमसमं येषां जने गीयते
तेभ्यः श्रीगुरुसोमसुन्दरतपागच्छाधिपेभ्यो नमः ॥ ९ ॥
श्रीजैनेश्वरधर्मनिर्जरतरुः काले कलावप्यसौ
यद्वाक्सौधरसेन नित्यमधुना संसिच्यमानः सताम् ।
वाञ्छायोग्यफलानि यच्छति, तपागच्छाधिपाः श्रीयुता-
लक्ष्मीसागरसूरयश्चिरमिमे मे सन्तु सन्तुष्टये ॥ १० ॥
श्रीलक्ष्मीसागरगुरुभाग्यादिगुणालिवर्णनवरेण्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नव्यं करोमि काव्यं गुरुगुणरत्नाकरं नाम ॥ ११ ॥

ये श्रीमज्जिनशासनार्णवसमुल्लासैकजैवातृका-
राजन्तेऽत्र युगे युगोत्तमगुरुप्रख्यप्रभावात्मकाः ।
स्तोष्ये हर्षवशादशेषसुदृशामिष्टार्पणप्रत्यलान्
लक्ष्मीसागरगच्छनायकवरानेतान् गुणैरुज्ज्वलान् ॥ १२ ॥

रत्नैरम्बुधिवद् गुणैर्बहुविधैर्येऽलङ्कृता यैरलं
नाऽलं स्याद् नवितुं हि तान् मम मतिस्तन्वी समस्तानपि ।
एकस्तेषु विशिष्य यो विजयते सौभाग्यनामा गुणो
वर्धिष्णुः सततं स्तुवे तदपि तं विश्वत्रयीविश्रुतम् ॥१३॥

येषां श्रीपुरुषोत्तमत्वसजुषां ताम्यत्तमोविद्विषां
लक्ष्मीसागरगोत्रसंश्रितिरभूत् तत्सांमतं सांप्रतम् ।
यन्नामस्मृतिमात्रतोऽपि परितः सर्वार्थसंपज्जुषा-
मन्येषामपि बोभवीति भविनां मेषाऽद्भुतं भूतले ॥ १४ ॥

यत्कः प्राश्वत्प्रतापः सवितुरतिशयी भूर्भुवःस्वःप्रकाशी
येषामास्ते यशोऽपि क्षपितुरभिनवं तामसध्वंस्यदोषम् ।
मुक्तापङ्क्तेर्यदीया गुणततिरधिका छिद्रमुक्ताऽपि तन्या-
द्यन्नॄणां कण्ठकान्तिं तदिह सुगुरवः केन तुल्याः स्युरेते?॥१५॥

अथैषां श्रीगुरूणामुत्पत्तिस्थानदेशपुरपितृमात्रादिवर्णनम्—

अभ्युद्यद्विषयोन्नताऽतनुमहःपूरा शिवप्रश्रया
या दीव्यन्नयनाऽथ मानवमता रैमौक्तिकाऽलङ्कृता ।
धत्ते मर्त्यसुखाकरं भवहरं श्रीगूर्जरत्राङ्गना
श्रीवाणीविलसद्विवेकपुरुषाऽऽश्लेषाद् वृषाख्यं सुतम् ॥ १६ ॥

तस्याः कोमलकाश्यपीशशिमुखीवक्षःस्थलालङ्कृति-
र्ग्रामः स्वर्मदमर्द्युमापुरमिति स्वाढ्यालयादिश्रिया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवत्स्वामियुगादिवीरजिनपप्रासादपुण्योत्सव-
प्र:श्राद्धसमृद्धवृद्धनगरासन्नः समस्तीह यः ॥ १७ ॥
मित्रप्रीतिपरायणः समकलाशाली सुवृत्तालयो
धाम्नाऽऽढ्यो महता–रजन्यरहितो यो निष्कलङ्कः कलौ ।
बिभ्रच्चारुवृषोच्चतां दिततमा नालीकसंपद्वरः
प्राश्वत्पार्वणरोहिणीरमणवद् देदीप्यमानः सना ॥ १८ ॥
सर्पद्द्वेषिशिलीमुखाऽक्षिततनुप्रोद्भूततेजोभर-
भ्राजच्चम्पकराजधीसखवरः सङ्घेश्वरः श्रीधरः ।
ऊकेशान्वयपद्मभास्वदुदयः श्रीकर्मसिंहाह्वयः
श्राद्धस्तत्र वसत्यसौ सुहृदयप्राणिप्रणीतप्रियः ॥ १९ ॥
( युग्मम् )

या गङ्गावदपङ्कपुण्यभवनाङ्गा शुद्धगोत्रोद्भवा
रम्भावत् कमनीयरूपकलिता कामं कुसङ्गोज्झिता ।
ब्राह्मीवत् परमेष्ठिजापरतताऽवासेष्टविद्याकला
लक्ष्मीर्वाङ्गजवत्यथाऽर्थिनिचये मिष्टान्नपानप्रदा ॥ २० ॥
मुक्तालीकलयोरुहारलतया तुल्या गुणैः सज्जया
पद्मिन्याप्ततुलाऽचलातिमृदुला पद्माकरैकालया ।
शीलर्द्धिः सुलसेव देवसुगुरुश्रद्धेद्धभक्त्यावहा
कर्मादेव्यभिधा बभस्ति सुभगा चैतस्य सा प्रेयसी ॥२१॥
( युग्मम् )

नीरोगाङ्गरमादिकाऽमितसुखं भुञ्जानयोरेतयो-
र्जज्ञे सूनुरनूनलक्षणरुचिः सुस्वप्नसंसूचितः ।
यावत्तावदतुच्छमुत्सवमसौ श्रीकर्मसिंहः पिता-
ऽकार्षीच स्वजनाङ्गनाऽऽवलिरलं वर्धापनाऽऽढ्यं विधिम् ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च—

श्रीमद्विक्रमतोऽब्धिरागदिगिरासंख्याधरे वत्सरे
मासे भाद्रपदे प्रदोषसमये कृष्णद्वितीयातिथौ ।
अश्विन्याह्वयभे तथा सति शुभे लग्नेऽत्र कुम्भाभिधे
जन्माऽजायत यस्य कस्य न विशः स स्यात् प्रशस्यः शिशुः॥२३

अथाऽस्य नामस्थापना—

अत्राऽयं भविता क्षमाधरमहाश्रीपक्षपातक्षमः
सेव्यः सद्विबुधैः सुधीर्नवसुधाभोगस्पृहः प्रत्यहम् ।
मत्वैवं किमु देवराज इति तन्नामाऽस्य निर्मापितं
धात्रा तातकृताऽतिविस्तरवरस्वज्ञातिवात्सल्यतः ॥ २४ ॥

पित्रादेः प्रथयन्नथैष पृथुकः प्रेमाऽप्रमं पञ्चधा
धात्रीभिः परिलालिताङ्गलतिकः सन् वर्धमानोऽनिशम् ।
लावण्यादिगुणाश्रितश्चतुरवाग्युग् देवराजः प्रजा-
ऽऽप्यायी सप्तसमावयाः समभवद् यावद्विवेकोदयः ॥ २५ ॥

तावत् सोत्सवमानयद् विनयिनं तं लेखशालां पिता
तत्रार्यद्विजसन्निधौ समकलाविद्यास्वधीती धिया ।
शश्वद्देवगुरुप्रणामनिपुणः पुण्यस्पृहः प्राप्तवान्
साधूपाश्रयमश्रमं पठितवानत्राऽऽर्हतं च श्रुतम् ॥ २६ ॥

( युग्मम् )

शृण्वानस्य सनाऽस्य नैकशमिनां श्रेयास्विनीं देशनां
सर्वं वैषयिकं सुखं विषसमं संपश्यतः संसृतौ ।
उत्पन्नं स्वमनस्यनेनासि भृशं वैराग्यमभ्रंशकं
दीक्षाऽऽदानमनोरथस्तदभवद् दक्षस्य बाल्येऽप्यहो ! ॥ २७ ॥

पित्रोर्ज्ञापितवान् यदाऽऽशयमिमं स्वं देवराजस्तदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्स ! त्वं मृदुसंवरोऽसि चरणाऽऽदानं त्विदं दुष्करम् ।
भुङ्क्ष्व श्रीयुवतीमुखं भवसुखं ह्येतद्‌ग्रहे वासरो-
ऽस्माकं सम्प्रति यं प्रतीति वचनं स्नेहेन तौ प्राहतुः ॥२८॥
भिन्नं नास्य मनो मनागपि गिरा पित्रोरमुष्यन्मते-
र्येष्वातुर्यचमत्करीकृतकृतिव्राताऽद्वितीयाकृतेः ।
प्रव्रज्योत्कलिकावतः कलिकलाकेलीप्सितप्रच्युते-
स्तत्केन क्व कदाऽन्वदायि शिवदा सैतन्मयाऽऽख्यायते ॥२९॥
अत्रास्य व्रतदातॄन् श्रीमुनिसुन्दरमुनीश्वरान् यावत् ।
अथ कथयामि कति श्रीगच्छपतीन् गौतमप्रभृतीन् ॥ ३० ॥

तथाहि-

यश्चिन्तामणिवच्चिनोति कृतिनां यच्चिन्तितार्थप्रथां
श्रीपृथ्वीवसुभूतिभूस्तदुचितं चञ्चत्प्रभावाञ्चितः ।
चित्रं श्रीगणधार्यपीह विदितो निर्ग्रन्थनाथाऽग्रिमः
श्रीवीरान्तिषदादिमः सुखयतात् स्वामी स नो गौतमः ॥३१॥
सेवासक्तशक्रमुख्यसुमनाः श्रीनन्दनाद्याातता-
रामैकक्षितिभूतकामितकरश्रीकल्पगच्छस्थितिः ।
धर्ता काञ्चन–सम्पदं गिरिगुरुर्मेरूपमां यः श्रितः
श्रीवीरस्य स पञ्चमो गणधरः सिद्ध्यै सुधर्माऽभिधः ॥३२॥
मुक्ताष्टापदकोटिनाटकरसप्रेङ्खत्कुमारीस्पृहः
सर्वज्ञोऽप्यथ यः किलेह विदितः स्वामी महानन्दभूः ।
श्रीजम्बूप्रभवादिबोधनपरः पुष्यात् सुखं वः सदा
वीरादन्तिमकेवली स च चतुःषष्ट्याऽभवद् वत्सरैः ॥३३॥
सूरीशप्रभवः प्रणाशितभवः शय्यंभवः श्रीयशो-
भद्रः सान्द्रयशोमयश्च विजयः सम्भूतितः सूरिराट् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भद्राद् बाहुरुपद्रवत्रुटिपटुः श्रीस्थूलभद्रप्रभुः
षट् त्वेते श्रुतकेवलादधिगतत्रैलोक्यभावा बभुः ॥ ३४ ॥
त्रैकाल्यार्थविदो महागिरिसुहस्त्याद्या घना जज्ञिरे
वज्रान्ता दशपूर्विणो जिनमतोद्द्योतोद्यताः सूरयः ।
वज्रस्वामिविनेयवृन्दवृषभः श्रीवज्रसेनस्तत-
श्चत्वारश्च युगप्रधानयतिपास्तस्याऽपि शिष्या इमे ॥ ३५ ॥
श्रीनागेन्द्रसुचन्द्रनिर्वृतिवरा विद्याधरश्चेति त-
स्तेभ्यो वेदमिताः सम्मतिमिताः शाखास्तदीयाख्यया ।
तासामन्तरसंख्यसाधुविसरैर्विस्तारमाप्ताऽवना-
वस्तोकास्तिककल्पिताऽतुलवृषा शाखाऽस्ति चान्द्री चिरम्॥३६॥
( युग्मम् )
तस्यां भूरिषु सूरिषु त्रिभुवनख्यातेष्वतीतेष्वभूद्
यो गच्छप्रभुरद्भुताऽतिशयभृद्विद्याब्धिरुद्द्योतनः ।
स प्रापाऽर्बुदसन्निधौ वटतले दृष्ट्वा मुहूर्तं शुभं
तत्राऽष्टौ गणपानतिष्ठिपदथो यत् तद् वटाऽऽह्वो गणः ॥ ३७ ॥
आद्यस्तेष्वथ सर्वदेवसुगुरुस्तस्याऽप्यनेकेऽभवन्
सन्ताने भुवनेऽतिशायिचरिताः श्रीदेवसूर्यादयः ।
धर्मोद्धारधुरन्धरा गणधरास्तेभ्यः क्रमाद् विक्रमाद्
ब्रह्माशार्यमहायने गुरुजगच्चन्द्राख्यसूरीश्वराः ॥ ३८ ॥
आचामाम्लतपो द्वियुग्दशसमास्तेपे क्षमापेशलै-
र्यैस्तन्नाम तपा इति क्षितिभृता येभ्यः प्रदत्तं तदा ।
तेभ्यश्चैष तपागणो गुरुजगच्चन्द्रप्रभुभ्यस्ततः
सेव्यः श्रावककोटिभिर्वटगणादासीदसीमोदयः ॥ ३९ ॥
अथ च–
श्रीदेवेन्द्राभिधगणधराः श्रीजगच्चन्द्रशिष्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मग्रन्थप्रमुखविविधग्रन्थगुम्फास्तयासन् ।
पीयूषाभां मुषितकलुषां यत्कभाषां निपीय
प्राप प्रीतिं पुलकितवपुर्वस्तुपालादिसङ्घः ॥ ४० ॥
सूद्वर्यायां जिनमतभुवि प्रादुरासीच्च येषां
वाग्वार्योगात् परमदलभूर्धर्मशालालतैषा ।
नव्या भव्याऽचलसमशमप्रायकायाऽपि लघ्वी
तुच्छो गच्छोऽप्यजनि किल यत्सङ्गतो वर्धमानः ॥ ४१ ॥
( युग्मम् )

विद्यानन्दश्रमणपतयस्तद्विनेयास्त्वभूवन्
पट्टे तेषामथ गणधरा धर्मघोषाभिधास्ते ।
पीत्वा पृथ्वीधरसचिवराड् गोरसं स्राग् यदीयं
दीप्रं शम्भुप्रभुवृषमहो ! पुण्यकार्यैः पुपोष ॥ ४२ ॥
शाकिन्यादेरशिवविसरोऽवारि विद्यापुरे यै-
र्जिग्ये योगी स्वकपरिकरक्षुद्रकार्युज्जयिन्याम् ।
शुद्धध्यानात् सलिलनिधिनाऽदर्शि रत्नं च येषां
तेषां विद्वानपि नु कवयेत् कोऽवदातान् प्रभूतान् ? ॥ ४३ ॥
( युग्मम् )

गोविज्ञातोदयमयकलावत्प्रसिद्धौ निदानं
शुद्धा येषां प्रतिपदभवद् नन्त्रमाऽन्याऽद्भुतं तत् ।
ते श्रीसोमप्रभगुरुवरा रेजिरे धर्मघोष-
प्रेङ्खत्पट्टोदयशिखरिणि द्वादशात्माऽनुकाराः ॥ ४४ ॥
मुक्त्वाऽष्टादशकूटभावकलितान् ये दोषटङ्कान् भवे
हट्टेऽस्माद् जगृहुर्महागुणमणीन् षट्त्रिंशतं त्वोजसा ।
ख्याता वीतवशास्तथाऽपि किल ते सोमप्रभाचार्यस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पट्टाऽलङ्कृतयोऽत्र सोमतिलका भट्टारका श्रेजिरे ॥ ४५ ॥
सूरीन्द्रानणहिल्लपाटकपुरे यान् गुङ्डीपल्वलो-
पान्तस्थान् प्रणतः समोदमुदयीपा नाम योगी तदा ।
पृष्टः श्राद्धवरैरवक् स च ममेत्युक्तं हि सिद्धिप्रदा-
अत्रैते पुरुषोत्तमाः कणयरीपाख्येन नाथेन तत् ॥ ४६ ॥

श्रुत्वेति योगिगदितं मुदितैरशेषैः
सङ्घैर्विशेषतरभक्तिरकारि येषाम् ।
तेऽवाप्तसोमतिलकाऽमलपट्टपद्माः
श्रीदेवसुन्दरगणप्रभवो बभूवुः ॥ ४७ ॥

अथ परमगुरुश्रीसोमसुन्दरसूरीश्वराणां कतिपयगुणवर्णनम्–

सुरनरविभुवन्द्यश्रीजयानन्दसूरि-
प्रवरकरसरोजात् संमदात् सोत्सवं यैः ।
रुचिरचरणलक्ष्मीरात्मसाद् निर्ममेऽद्रि-
ज्वलनजलधिधात्रीवत्सरे विक्रमार्कात् ॥ ४८ ॥

तदनु निजतनोर्ये यत्यजेयं प्रमाद-
द्विषमतुषमनीषोत्कर्षतोऽपास्य दूरम् ।
बभुरिह गुरुराजज्ञानयुक्सागराज्ञा-
ऽस्मयविनयसपर्याऽवाप्तविश्वाप्तविद्याः ॥ ४९ ॥

अपहृतभवितापाः पुण्यपद्माकरा ये-
नवमरसकलापा नीरजस्थित्युदाराः ।
सततमऽधुरऽनेकोच्चागमानद्भुतं तद्
मधुपमुखपताद्भिर्नानुषङ्गं त्वकार्षुः ॥ ५० ॥

तुरगशरगवांऽह्रिक्ष्मामिते विक्रमाब्दे
गणधरपदमापुः पत्तने गूर्जरोर्व्याम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करसरसिरुहा श्रीदेवयुक्सुन्दराणां
नरवरनरसिंहाऽऽख्यरम्योद्भवैर्ये ॥ ५१ ॥
गुरुधरणविहाराद्यार्हतोच्चुङ्गगेहाः
सपदि यदुपदेशात् कारिताः श्रावकेन्द्रैः ।
व्यरचि शुचिमहोघैर्यैश्च तारङ्गकादा-
वजितजिनमुखार्हद्विम्बलक्षप्रतिष्ठा ॥ ५२ ॥
गृहिविहितमहीयोविस्तरैः स्थापिता यै-
रमरफलदमानाः सूरयो वाचकाश्च ।
विबुधगणिपदानि प्रापिता दीक्षिता ये
गुरुसदृगपि तेषां वेत्ति संख्यां न कोऽपि ॥ ५३ ॥
कति यतिवृषभा यद्देशनादुग्धपानाद्
विजनविपिनवासं शिश्रियुः कष्टकृत्यै ।
अभवदतितपस्वी चाऽन्यचारित्रिराशि-
श्वरमजिनतपस्कृत् शान्तिचन्द्राख्यभिक्षुः ॥ ५४ ॥
अगणितगणयो यद्वारके सर्वविद्या-
प्रमथितपरमत्युन्मत्तताभीत्यभेद्याः ।
प्रतिपुरमतिमात्रश्रीभृतो भूपमान्या
व पुरि शुशुभिरे च श्राद्धवर्गा वदान्याः ॥ ५५ ॥
( मालिनीच्छन्दसा काव्याष्टकम् )
चारित्ररत्नजिनमण्डनहेमहंस-
श्रीसोमदेवसुसुधादिमनन्दनाद्याः ।
के वाचका गुरुधियः कति सूरयो वा
येषां विनेयविभवो बहवो बभूवुः ॥ ५६ ॥
ये योगशास्त्रलघुभाष्यगुरूपदेश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मालादिकप्रकरणावलिबालबोधात् ।
कल्याणकादिविविधस्तवमुख्यशास्त्रा-
ण्यस्राक्षुरक्षितशमाः स्वपरोपकृत्यै ॥ ५७ ॥
संवेगरङ्गगुणितात्रिसहस्रसंख्य-
स्वाध्यायकाः प्रतिदिनं च निरीहनाथाः ।
निद्रोदयेऽपि विदधुः स्ववपुःप्रसारं
ये नाऽप्रमार्ज्य, यतना क्क विशीदशी स्यात् ? ॥५८॥
आशादिपल्लिवसतिर्गुणराजनामा
यद्वाक्श्रुतेः सहवर्यैरकरोत् कृतीशः ।
देवालयैर्दशभिरस्तविमानमानै-
रूकेशमौलिरतुलां विमलादियात्राम् ॥ ५९ ॥
गोविन्दकारितगजाङ्कजिनप्रतिष्ठा
तारङ्गकेऽथ महती गुणराजयात्रा ।
यो देवराजजनितो मुनिसुन्दराणां
यद्दीयमानगणधारिपदे महश्च ॥ ६० ॥
निर्मापितं नगरराणपुरे यदुच्चं
चैत्यं चतुर्मुखमथो धरणास्तिकेन ।
यद्वारकेऽत्र करणीयचतुष्कमेत-
ज्जातं चमत्कृतिकरं चतुराङ्गभाजाम् ॥ ६१ ॥
( युग्मम् )

आकर्ण्य यद्गुणगणं गृहिणः प्रहृष्टा-
लेखेन दुष्कृततत्तीरतिदूरदेशात् ।
विज्ञाप्य केऽपि कृतिनः परपक्षिभाजोऽ-
प्यालोचनां जगृहुरास्यकजेन येषाम् ॥ ६२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीगौतमप्रतिमतां दधतां विधूताऽ-
न्तर्विद्विषां परमशर्मजुषां च येषाम् ।
नामस्मृतेरपि भवेद् भविनामभीष्टा
सर्वार्थसिद्धिरधुनाऽपि सुधर्मभाजाम् ॥ ६३ ॥

( सिंहोद्धताच्छन्दसा काव्याष्टकम् )

यो यो व्यधायि त्वयि मृत्युपायो-
मया तवाऽथात् स स निष्फलोऽभूत् ।
तन्मेऽपराधं क्षमिराट्! क्षमस्वा-
ऽऽचार्यो जरीयानिति कश्चिदाख्यत् ॥ ६४ ॥

यत्कारितं मनोरमकल्पद्रुमनामपार्श्वजिनबिम्बम् ।
खीमाईश्राविकया प्रतिष्ठितं यैश्च तदतिमहत् ॥६५॥

इत्याद्यद्भुतपुण्यकारणचणाः सम्यग्गुरूद्यद्गुणाः
ये दोषैरखिलैरनाप्ततनवस्त्वौन्नत्यभृत्साधवः ।
ते श्रीसुन्दरदेवसुन्दरमहापट्टप्रभावावहाः
सर्वेष्टा गवि सोमसुन्दरवरा रेजुर्गणाधीश्वराः ॥६६॥

अथ श्रीमुनिसुन्दरसूरीश्वराणां सर्वगुणसंपूर्णानामपि
कियद् गुणवर्णनम्–

अध्यात्मकल्पद्रुमवल्गुगुर्वा-
वलीविचित्राऽऽप्तपतिस्तवादीन् ।
ग्रन्थान् बहून् ग्रेथुरजिह्ममत्या
येऽपास्तवाचस्पतिदर्पदीप्त्या ॥ ६७ ॥

श्रीसूरिमन्त्रस्मरणाऽतिशेषात्
षष्ठाष्टमादेश्च तपोविशेषात् ।
प्रत्यक्षतामाययुरार्यपद्मा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्यादिदेव्यः प्रमदेन येषाम् ॥ ६८ ॥
निर्माय यैः शान्तिकरं स्तवं नवं
निवारिता मारिरिहाऽतिदुस्तरा ।
ध्यानात्तथा तिङ्कभरेतिरञ्जसा
जाग्रद्गुणैर्जैनमतप्रभावकैः ॥ ६९ ॥
पीयूषयूषमधुरात्मगिरा दुरन्त-
माऽऽनेमुषामिह विमोहविषं हरन्तः ।
भव्योत्सवं भुवि विहारविधिं सृजन्तः
श्रीमानतुङ्गगुरुवन्महिमर्द्धिमन्तः ॥ ७० ॥
सत्क्षुल्लुलाभमनिभश्रुतसंविदेकाऽऽ-
लोकात् समीक्ष्य मुनिसुन्दरसूरिराजाः ।
स्वाश्रय्युमापुरमुमापुरनामधेयं
ग्रामं क्रमादनुपमं तमुपागमंस्ते ॥ ७१ ॥
( युग्मम् )

प्रीतस्ततस्तत्र स कर्मसिंह-
स्तेषां प्रवेशोत्सवमाश्वकार्षीत् ।
संमानतो मेलितसङ्घराशेः
सद्वस्त्रैरटङ्ककदानपूर्वम् ॥ ७२ ॥

इतश्च—
फलवानद्य मनोरथमरुत्तरुर्मे फलेग्रहिस्त्वजनि ।
जनिरपि यदत्र पादावधारिताः सन्ति सद्गुरवः ॥ ७३ ॥
ध्यात्वेति देवराजः समुद्रवन्दे सताननूचानान् ।
प्रदद्त मे व्रतमतनोदिति विज्ञप्तिं च तत्पुरतः ॥ ७४ ॥
दीर्घायुर्धीधर्मश्रीशर्मदमुख्यपूर्णरेखाढ्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करतामरसं तावत्तैरस्य निरीक्षितं नितराम् ॥ ७५ ॥
सर्वाङ्गचङ्गिमानं कुमारमिममीक्ष्य तदनु ते यतिपाः ।
भावी गुरुपदवीभागयमेवं भावयामासुः ॥ ७६ ॥
दापयताऽस्य तपस्यां सुतस्य भोः ! आयतौ हि भवभेत्तुः ।
भवदादीनामिति ते जगुस्ततः कर्मसिंहाग्रे ॥ ७७ ॥
स तदा तान् प्रत्येतामदर्शयद् जन्मपत्रिकामस्य ।
दृष्ट्वा पुनराहुरमी इहाऽपि चारित्रयोगोऽस्ति ॥ ७८ ॥




तदपि पिता नाऽनुमतिं व्रतदानेऽदादमुष्य स ततोऽवक् ।
खेदकृदेतद्विषये जननीं प्रति देवराजसुधीः ॥ ७९ ॥
कीदृगयं भविताऽग्रे तयेति पृष्टे त्ववादि गुरुभिस्तैः ।
श्रीगणपतिरिति मुदिता दत्तवती सा क्षमाश्रमणम् ॥८०॥
( आर्य्याऽष्टकेन कुलकम् )

ततश्च—

ग्रामादितः सपदि सङ्घदृढाऽऽग्रहेण
प्राप्तेषु पत्तनममीषु शमीश्वरेषु ।
ग्रामान्तरं गतवति स्वपतौ च कर्मा-
देव्यप्यगात् सममनेन सुतेन तस्मिन् ॥ ८१ ॥
पूज्याः ! प्रयच्छत जवाद् व्रतसंयमं मे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽत्राऽपि प्रणम्य च गुरून् अमुनेत्थमुक्ते ।
ते पत्तनादपि निदानपुरं तदानी-
मीयुर्जिनाऽभिनमनाय तदन्तिकस्थम् ॥ ८२ ॥
तत्राम्बया बहुधनैरनया प्रणीते
कान्तक्षणे सुकृतिसन्ततिसाक्षिकं तैः ।
दीक्षा ददेऽस्य मुनिसुन्दरसूरिपादै-
रब्देऽम्बराऽम्बुनिधिवेदविधुप्रमाणे ॥ ८३ ॥
लक्ष्मीवदत्र भविकाऽमितसातदाता
गम्भीरतादिगुणरत्नरमारतिश्च ।
भाव्येष सागर इवेति विभाव्य लक्ष्मी-
युक्सागरेति विदधेऽस्य ततोऽभिधा तैः ॥ ८४ ॥
( चतुर्भिः कलापकम् )

अथैषां श्रीलक्ष्मीसागराणां गणिपण्डितवाचकपदप्राप्तिसमयकथनम्—

भक्त्याऽऽदरेण मुनिसुन्दरसूरिराजां
पार्श्वे प्रसन्नमनसां परभागभाजाम् ।
सिद्धान्तमुख्यसमवाङ्मयमल्पकालं
ये ह्यध्यगीषत विशुद्धधिया रसालम् ॥ ८५ ॥
सत्तर्कवादकविताकरणैकतानै-
रुत्तार्य्य मानविषमाऽऽशु वचोवितानैः ।
दुर्वादिनां शिशुदशा अपि जीर्णदुर्गे
येऽरञ्जयन्नरपतीन् महिपालमुख्यान् ॥ ८६ ॥
षड्जीवकाययतनारचनापवित्रं
येऽपालयन्ननतिचारचयं चरित्रम् ।
नित्यं चिरन्तनमुमुक्षुवदप्रमत्ता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाह्यान्तरङ्गरिपुपङ्क्त्यनुपात्तचित्ताः ॥ ८७ ॥
विश्रामणादिविनयप्रतिपत्तिकृत्या
सत्यापनं विदधतः शुचिसंयतानाम् ।
प्रापुः क्रमेण गणिनाम पदं विवाह-
प्रज्ञप्तियोगवहनात् समहामहं ये ॥ ८८ ॥
श्रीसोमसुन्दरगुरुप्रवरैः प्रदत्तं
येभ्यः सुपण्डितपदं प्रथिते महेऽत्र ।
आगत्य देवगिरितः कृतिना महादे-
नाम्ना महीयसि रसग्रहदिग्प्रसाऽब्दे ॥ ८९ ॥
मुण्डस्थलेऽथ मुनिसुन्दरसूरिभिर्यै-
र्ये स्थापिता तदनु वाचकतापदव्याम् ।
भीमेन सङ्घपतिना निजबान्धवेना-
ऽऽरब्धोद्भवे विधुवियद्वसुधाऽङ्कवर्षे ॥ ९० ॥
श्रीसोमसुन्दरगुरूत्तमपट्टपद्म-
प्रद्योतना गणधरा मुनिसुन्दराख्याः ।
श्रीलक्ष्मिसागरवरैरथ वाचकैस्तै-
स्ते चक्रिरे परिवृता नहि केषु हर्षम् ?॥ ९१ ॥
( सप्तभिः कुलकम् )

अथ श्रीजयचन्द्रसूरिश्रीजिनकीर्तिसूरिश्रीविशालराजसूरिवर्णनकणः-

याम्याऽऽदिदिग्मिलितदुर्मदवादिभट्टा-
न्निर्भर्त्स्य तर्ककविताक्षतियुक्तिपङ्क्त्या ।
ये लेभिरे बिरुदमिभ्यसभासमक्षं
तैरेव तूक्तमिह कृष्णसरस्वतीति ॥ ९२ ॥
चन्द्रार्कदीप्रतरकीर्तितपःप्रतापाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापप्रणाशनिपुणाः प्रणतप्रजानाम् ।
धीराऽजिताश्च मुनिसुन्दरसूरिपट्टे-
ऽजायन्त तेऽत्र जयचन्द्रगणाऽधिराजाः ॥ ९३ ॥
( युग्मम् )

संवेगतो गुणदृढं सकुटुम्बकैर्यैं-
राश्रित्य संयममधीत्य च सत्यविद्याः ।
मुक्त्यर्थमत्र विहितान्यतिदीर्घशास्त्रा-
ण्युच्चश्रियेऽत्र जिनकीर्तियतीश्वरास्ते ॥ ९४ ॥
येऽलङ्कृतिव्रजकृतप्रमदाधिकश्री-
गोपीवरास्तदुचितं हि सुविश्वरूपाः ।
यन्कृत्तदर्पकरमाः कुतुकं तु तत् ते
चक्रुर्न कस्य यतिराजविशालराजाः ? ॥ ९५ ॥

अथ परमगुरुश्रीरत्नशेखरसूरिवर्णनम्-

ये वेदरादिषु पुरेषु पटिष्ठभट्ट-
चेतोमरट्टमपहृत्य वचःप्रपञ्चैः ।
शीर्षेष्वशेषविदुषां विदधुर्बुधेशा
बाल्येऽपि सार्थकमहो ! निजनाम मेध्यम् ॥ ९६ ॥
ग्रन्थान् प्रतिक्रमणसूत्रविवृत्तिवीत-
रागस्तवाऽऽस्तिकविधिप्रमुखान् प्रशस्यान् ।
येऽरीरचन्नथ च विश्वजनीनचित्ता-
श्चातुर्यवद्वचनरञ्जितनागरेभ्याः ॥ ९७ ॥
सन्देहसंहतिहलाहलहारिणो ये
सद्देहिनामऽतमसो विमलान्तरङ्गाः ।
साम्यं मणेरऽधुरऽगण्यरुषादिदोषाऽऽ-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगालिमालिकलिकुण्डलिमौलिकोटौ ॥ ९८ ॥
यद्दीक्षिताः कतिपये यतयो भजन्ते-
ऽनूचानवाचकपदान्यधुना सुधीनाः ।
ये पण्डिताश्च गणयो गरिमाऽभिरामा-
स्तेषां तु कोऽपि गणनाभणनाय नाऽलम् ॥ ९९ ॥
सर्वाद्भुतश्रुतधरा अपि विश्रुता ये
कामोद्भवा अपि च नित्यमनङ्गनाशाः ।
भान्ति स्म तेऽत्र जयचन्द्रगणेन्द्रपट्टे
श्रीरत्नशेखरवरास्तपगच्छनाथाः ॥ १०० ॥
(पञ्चभिः कुलकम्)
सङ्घाग्रहादथ विहारविधानतस्ते
सूरीश्वरा बहुपुराणि पवित्रयन्तः ।
श्रीमेदपाटपृथिवीमुकुटाभमज्जा-
पद्राभिधाननगरं समहं समीयुः ॥ १०१ ॥

अथ श्रीउदयनन्दिसूरिवर्णनम्-

आदाय संयमकृपाणमपारतेजः-
श्रीकङ्कलोहमयमुज्झितकोशशोभम् ।
आसि स्यदादहितराशिरऽशेषसत्त्व-
वर्गे कृपालुहृदयैरिह यैरमायैः ॥ १०२ ॥
श्रीपूज्यपादपदवन्दनहेतवे ते
तत्रागमन्नुदयनन्द्यभिधा मुनीन्द्राः ।
श्रीलक्ष्मिसागरसुवाचकपुङ्गवाश्चा-
ऽन्येऽपि प्रधानविबुधा बहुसाधुसाध्व्यः ॥ १०३ ॥
इतश्च-
साईसजुःसमधरास्तिककारितेऽस्मि-

न्नुसुङ्गजैनभवने स्वधनेन पूर्वम् ।
तैर्गच्छपैर्व्यरचि तत्र महादिभद्र-
प्रासादसार्वपतिमूर्तिततिप्रतिष्ठा ॥ १०४ ॥
आत्माऽमितान्यपुरमेलितसङ्घसङ्घ-
वात्सल्यवस्त्रवरराजतटङ्कदानैः ।
प्राग्वाटशाठिकनराग्रिमकर्मनाम-
श्रद्धालुनाऽतिमहति प्रथिते महेऽस्मिन् ॥ १०५ ॥
तस्याग्रहाच्च वयजाह्वसुहृद्युतस्य
श्रीविक्रमाद्वसुखपुङ्खशशाङ्कवर्षे ।
श्रीलक्ष्मिसागरसुवाचकनायकानां
प्रादायि सूरिपदवी गणमोदकानाम् ॥ १०६ ॥
( त्रिभिर्विशेषकम् )

अथ श्रीसोमदेवसूरिवर्णनम्-

विद्याविवादमदमेदुरवादिवृन्दं
वाक्यैर्निवार्य नृपपर्षदि हर्षवर्षैः ।
यै रञ्जितः स्वककवित्वकलाऽतिरेका-
त्क्षुल्लैरपि क्षितिपतिः किल कुम्भकर्णः ॥ १०७ ॥
श्रीपावकावनिपसज्जयसिंहजीर्ण-
दुर्गेशमण्डलिकहाममुखा नरेन्द्राः ।
आत्मीयगीर्मधुरताकवितासमस्या-
पूर्त्याऽऽदिना हृदि चमत्कृतिमापिता यैः ॥ १०८ ॥
भूजानिरञ्जनकलावलवप्पभट्टि-
कल्पास्त्वनल्पधिषणा धिषणाऽनुकाराः ।
ये देवसूरिसदृशाः कुदृशो जयित्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैकस्तवस्तुतिविधानजिनप्रभाभाः ॥ १०९ ॥
तेभ्यो ददुर्नगरराणपुरे क्षणौघे
सूरेः पदं धरणसङ्घपतिप्रणीते ।
श्रीसोमदेवगणिवाचकनायकानां
श्रीरत्नशेखरवरा गणधारिणस्ते ॥ ११० ॥
( चतुर्भि:कलापकम् )

अथ समकं गुरुचतुष्कवर्णनम्-

द्वौ द्वौ रवी शशधराविति तेऽब्धिमानाः
प्राप्ताः किमत्र समकं तमसाश्छिदायै ? ।
धर्मादयः किमथवा विमला इमेऽर्थी
मूर्ताः स्वसेविषु सदा सुखपोषणार्थम् ? ॥ १११ ॥
श्रीरत्नशेखरगुरूदयनन्दिसूरि-
श्रीलक्ष्मिसागरसुधीश्वरसोमदेवाः ।
नैकैः सकर्णपुरुषैरिति वर्ण्यमाना-
निन्युः स्वगोभिरिह सार्ववृषं विवृद्धिम् ॥ ११२ ॥
( एवं वसन्ततिलकाछन्दसा संलग्नकवित्वद्वात्रिंशिका )
श्रीमन्मालवमेदिनीन्दुवदनाऽलङ्कारहारप्रभो-
रुग्रामागरवासिकर्मतनयश्रीरत्नसङ्घप्रभोः ।
आक्षेपाद्विधुवेदवर्ष्मवसुधावर्षे सुभिक्षोद्भवे
लक्ष्मीसागरसूरिराजविलसद्भाग्यप्रकर्षस्तवे ॥११३॥
श्रीजम्बूसमसोमसुन्दरगुरोः श्रीसोमदेवाह्वयः
शिष्यः सूरिवरश्च शिष्यवृषभश्चारित्रहंसोऽस्य यः ।
तस्य श्रीविबुधस्य शिष्यशिशुना काव्ये मुदा निर्मिते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्गोऽयं प्रथमोऽभवद्गुरुगुणाद्रत्नाकराख्याश्रिते ॥११४॥

( युग्मम् )

इति परमगुरुश्रीलक्ष्मीसागरसूरीश्वराणामुत्पत्तेरारभ्य भट्टारक-
पदप्राप्तिसमयं यावत् श्रीगौतमादिगणधरपरम्परावर्णनगर्भो
गुरुगुणरत्नाकरनाम्नि काव्ये प्रथमः सर्गः ॥

अर्हम्

# अथ द्वितीयः सर्गः ।

वक्ष्यथ लक्ष्मीसागरसूरीणां गच्छनाथताऽवसरम् ।
यत्पुनरिह विहितं तैः सुपुण्यकार्यं स्वयं तदपि ॥ १ ॥
आचार्या ये मालवादौ विहारं चक्राणाश्चार्हत्प्रतिष्ठादिकृत्यम् ।
ग्रामे ग्रामे निर्मितोरुक्षणं श्रीसङ्घं पुण्यं लम्भयन्तः शुभार्थम् ॥२॥
अश्वश्वेतज्योतिरक्षक्षमाऽब्दे पौषे मासे विक्रमाद् यावदासन् ।
ये सूरिश्रीरत्नयुक्शेखराणां पट्टे लक्ष्मीसागरा गच्छनाथाः ॥३॥
तावल्लाटापल्लिपुर्यां चतुर्धाश्रीसङ्घेनागत्य नानापुरेभ्यः ।
आनन्देनाऽऽनम्य यान् पूज्यपादान् सद्वात्सल्याद्युत्सवश्च व्यधायि॥

( युग्मम् )

वि-स्त्रगुम्नोदारदेहप्रदीप्त्याऽपूर्वाऽखर्वाऽगर्वविद्याविनोदैः ।
वैराग्येण त्यक्तबाह्यार्थकोशैरङ्गीचक्रे स्थूलभद्रोपमा यैः ॥५॥
येभ्यो विभ्रद्भ्यः सहस्राक्षभावं भास्वज्ज्योतीरुच्यसम्बाश्रितेभ्यः।
विश्वाबाधामुग् नमः सत्क्षमाभृच्चक्रं चक्रे स्वीयपक्षप्रवृद्ध्यै ॥६॥
येभ्यः केचित्साधवोऽवाप्तविद्या देदीप्यन्ते नव्यकाव्यप्रकाराः ।
तन्वानास्ते स्वोदयं सर्वदिक्षु प्रत्तक्षेमाः संमुखाः स्वध्वयाताम्॥७॥
त्रिंशच्चत्वारिंशदब्देभ्य आगाद् यः प्राग् येषामेकशो दृष्टिमार्गम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहीदानीमेष मद्दक्षूपलक्ष्यः स्यादीदक्षा धारणा कस्य विश्वे?॥८॥
नैकेषु श्रीगच्छनाथेषु सत्सु प्राधान्यं येष्वेव जज्ञे महिम्ना।
राज्ञीबोधत्यग्रहेषु ग्रहेषु श्रीमल्लक्ष्मीसागराः केन तुल्याः?॥९॥
(सप्तविभक्तिक्रमं शालिनीछन्दसा काव्याष्टकम्)

यान् मालवस्थानवलोक्य गूर्जरक्ष्मायामवाप्तावसरेण साधवः।
स्वसेवकाः केऽपि कृताः कलिक्षमाभृता ततोऽभूद्रण एष सव्रणः१०

अथैतन्मेलकृतिः–

वाग्देवतादत्तवरा व्रतीश्वरा-
दीव्यद्वपूरूपपराजितस्मराः।
चकाशिरे ये कविमौलिमण्डना-
नुकारकाः श्रीगुरुरत्नमण्डनाः॥ ११ ॥
श्रीसोमदेवाह्वयसूरिसूत्रिता-
त्याक्षेपतः पक्षपृथक्त्वमोक्षिषु।
निर्णिक्तहेमेव नतेषु तेषु च
श्रीस्तम्भतीर्थे नगरे गुरूत्सवैः॥ १२ ॥
स्वदृक्शरोर्वीशरदि व्यधायि यै-
र्यदा गणैक्यं घनसङ्घसाक्षिकम्।
तदाऽन्यपक्षीयमहात्मनामपि
प्रकाममासीन्मनसीह विस्मयः॥ १३ ॥
(चतुर्भिः कलापकम्)

महाव्रतित्वं किल नैकशो नरा-
यत्पाणिनाऽथो विबुधत्वमापिताः।
सुब्रह्मतां श्रीधरतां च यद्गिरा
कस्येदृगाऽऽस्ते गरिमा जगत्त्रये?॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सितां सिताश्मप्रतिमां सुधां सुधा-
मधूलकां वा लपनश्रियं खलम् ।
तथेक्षुदण्डं तृणमेव मेनिरे
यद्वाचमास्वाद्य विदां वरा नराः ॥ १५ ॥
तपा इति ख्यातिमतां महात्मनां
कर्तुं हि युक्ता विकृतिर्न नित्यशः ।
तत्पक्षपर्व्यां क्षपणादिकारकै-
र्यैस्त्याजिताऽऽज्यादिरियं जितेन्द्रियैः ॥ १६ ॥
श्वेताम्बरेति स्वकरूढिसूनृती-
कृते वितीर्णानि यतिव्रजाय यैः ।
श्वेताम्बराणि व्यवहारिणां नृणां
बोधाय तद्दानविधाविवाऽथवा ॥ १७ ॥
(उपजातिच्छन्दसाऽष्टकम्)

अथैषां गच्छपरिधापरिधानिकाविधिः-

विक्रमात्पाणिपादाक्षक्षमावर्षे स्वहर्षतः ।
तपागच्छस्य यैर्वेषैरारब्धा परिधापना ॥ १८ ॥
यैराचार्या उपाध्यायाः स्थापिताः परिधापिताः ।
ये तेषामभिधां वक्ष्ये श्लेषाच्चात्रान्तिषत्प्रमाम् ॥ १९ ॥

अपि च-

श्रीरत्नमेघादिभिरिभ्यधुर्यै-
र्यद्वारके मापि च यत्प्रसादात् ।
तत्राहमाऽऽख्याः कियतां यतीना-
माख्यामि ता याः श्रुतिमागता मे ॥ २० ॥

अथ च-

लक्ष्मीसागरसूरीशैः पूर्वं तैः परिधापिताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वदृक्संयतार्याः श्रीसुधानन्दनसूरयः ॥ २१ ॥
विश्रामानर्थराराध्याऽनगारार्यास्ततः पुनः ।
सूरयः शुभरत्नाख्याः शुभरत्ननिधिप्रभाः ॥ २२ ॥
महाव्रतपदव्यक्तव्रत्यार्याङ्गीकृतक्रमाः ।
श्रीमत्सोमजयाचार्या यशःसोमजयोद्यताः ॥ २३ ॥
ज्ञानामृतरुचिस्फीतसंवरश्रमणाऽग्रिमाः ।
आचार्या जिनसोमाख्याः सोमजार्जुनकीर्तयः ॥२४॥
गुणरामितपोधाममुनिसत्याप्तसेवनाः ।
वृजिनध्वान्तहंसाः श्रीजिनहंसाह्वसूरयः ॥ २५ ॥
विश्वभूतहिताचारचारित्र्यार्याश्रितास्ततः ।
सूरयः सुन्दरा मत्या श्रीमत्सुमतिसुन्दराः ॥ २६ ॥
भयेन्द्रियजयेद्धश्रीश्रमणार्याऽनुरागिणः ।
स्वशिष्याग्र्याश्च सूरीशाः श्रीमत्सुमतिसाधवः ॥ २७ ॥
भास्वच्चारतपःपूतशरीरव्रतिशालिनः ।
धन्यराजप्रियप्रज्ञाः श्रीराजप्रियसूरयः ॥ २८ ॥
अहीनेन्दुशुचिश्लोकधारिचारित्रिसाधवः ।
अनूचाना नतानेकनरेन्द्रा इन्द्रनन्दयः ॥ २९ ॥

अथ वाचकाः—

सदानन्दकराऽमन्युमुन्यार्या जुष्टमूर्तयः ।
श्रीमन्महीसमुद्राह्वा महोपाध्यायपुङ्गवाः ॥ ३० ॥
क्षमारामयमारामघनसंयमिसंश्रिताः ।
श्रीमल्लब्धिसमुद्राख्या उपाध्याया महोमयाः ॥ ३१ ॥
तत्त्वदृष्टिगरिष्ठाङ्गव्रत्यार्यासादिताश्रयाः ।
उपाध्यायाः प्रशस्याऽयाः श्रीमन्तोऽमरनन्दयः ॥ ३२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कु[११]विद्याऽब्धिभित्साधुसत्याराधितविग्रहाः ।
कुशाग्रीयधियः श्रीमज्जिनमाणिक्यवाचकाः ॥ ३३ ॥
जग[१२]तीजनताऽऽदेयवचोवाचंयमाश्रमाः ।
वाचका धर्महंसाख्या धर्महंससरःसमाः ॥ ३४ ॥
मण्डिताश्चरणच्छा[१३]याभूदमायमहात्मभिः ।
उपाध्यायपदोपेताः श्रीमदागममण्डनाः ॥ ३५ ॥
यति[१०]धर्मकृतिप्राप्तगौरवव्रातिभूषिताः ।
इन्द्रहंसा उपाध्याया इन्द्रहंससमौजसः ॥ ३६ ॥
अ[११]ङ्गजन्माऽऽग्रकाङ्क्षिस्तुमुमुक्षुक्षेमसौख्यदाः ।
वाचका गुणसोमाख्या मुख्या मेधाविवाग्मिनाम् ॥ ३७ ॥
तथाऽमा[१२]सैपराहार्ययत्यार्या वरवाचकाः ।
श्रीमन्तोऽनन्तहंसाह्वाः सुबह्वागमवेदिनः ॥ ३८ ॥
भुव[१४]नाद्भुतकृत्साधुधुर्याः श्रीसङ्घसाधवः ।
वाचका वाक्यचातुर्याऽऽवार्जिताऽऽर्यसभासदः ॥ ३९ ॥
यद् न्यगादि मया मानमेषामन्तिषदामिह ।
अनुमानेन तद् न्यूनाऽधिकत्वे नैव दूषणम् ॥ ४० ॥

अथ कति विबुधाभिधाः–

यैरथार्पितवेषाणामशेषाणां महात्मनाम् ।
संख्यां ख्यातुमलं नाहं तादृग्ज्ञप्तेरयोगतः ॥ ४१ ॥
गीतार्थानां तथाऽप्यत्र ब्रुवे नामानि कानिचित् ।
कौतुकादेतदाख्याऽन्तस्थाऽष्टवर्गाक्षरक्रमात् ॥ ४२ ॥
राजतिलकशुभतिलकाऽभयतिलका अमरभुवनशिवतिलकाः।
श्रीसिद्धान्तविवेका भुवनविवेकाऽभिधा विबुधाः ॥४३॥
एतेऽक्रान्ता मता भूरिभूतेष्टा अष्टविष्टपे ।



Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

सर्वमङ्गलयाऽऽश्लिष्टाः श्रीमहाव्रतिमूर्तिवत् ॥ ४४ ॥
( युग्मम् )

जयरुचिसिद्धान्तरुची अथ प्रभाराजमेरुराजवराः ।
जयराजचन्द्रराजाऽमरराजानन्दराजाख्याः ॥ ४५ ॥
सुन्दरराजो नन्द्यादिमसहजानन्दसहजनामानौ ।
शिववदमी एकादश विबुधाः स्मरहा अपि च-जान्ताः ॥४६॥
( युग्मम् )

श्रीसुधाभूषणा लब्धिभूषणाऽभयभूषणौ ।
देवभूषणनामानस्तथा कमलभूषणः ॥ ४७ ॥
बुधाः प्रतिष्ठाकल्याणाऽभयकल्याणसंज्ञकाः ।
जयकल्याण एतेऽष्टौ णान्ता दिग्गजतेजसः ॥ ४८ ॥
( युग्मम् )

सत्सुविहिताभयश्रुतसंज्ञौ सुमतिश्रुतेन्द्रशीती च ।
मुनिकीर्तिनेमिकीर्ती सुलब्धिकीर्तिस्तिलककीर्तिः ॥४९॥
सिद्धान्तादागमात्कीर्ती तथा विनयमूर्तयः ।
धीरमूर्तिवरानन्दमूर्तिसंयममूर्तयः ॥ ५० ॥
सत्तिलकमूर्तिलब्ध्यादिममूर्ती षोडशेति विबुधाः स्युः ।
इन्दुकला इव विमला एतेऽतान्तास्तथाऽत्यन्ताः ॥ ५१ ॥
( त्रिभिर्विशेषकम् )

ज्ञानप्रमोदचरणप्रमोदसंज्ञौ जिनप्रमोदश्च ।
भावानन्दः पुण्यानन्दः श्रीरत्ननन्दिवराः ॥ ५२ ॥
श्रुतनन्दिरभयनन्दिप्रभुसंयमनन्दिराजनन्द्यभिधाः ।
दश दिक्पतय इवैते दान्ताः सुमनःश्रिता विबुधाः ॥५३॥
( युग्मम् )

जयसाधुचरणसाधू बुधाश्च सिद्धान्तसाधुगुणसाधू ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्कमलसाधुरेते ध्वन्ताः स्वस्तरव इव पञ्च ॥ ५४ ॥
श्रीसत्यरत्ना वरमेरुरत्नाः सच्चन्द्ररत्ना अथ नेमिरत्नाः ।
लब्ध्यादिरत्नास्तदनु प्रतिष्ठारत्नाः सुधारत्नसुसूररत्नाः॥५५॥
सत्तिलकरत्नलक्ष्मीरत्नसमयरत्नचरणरत्नाख्याः ।
सुमतिरत्नेन्द्ररत्नौ कुलरत्नः कमलरत्नश्च ॥ ५६ ॥
सरसोमसोममण्डनशिवमण्डनसमयमण्डनाह्वानाः ।
लक्ष्मीमण्डनभावादिममण्डनकमलमण्डनकाः ॥ ५७ ॥
श्रीपुण्यनन्दना हेमनन्दना धर्मनन्दनाः ।
प्रभाऽभयागमेभ्यश्च वर्धनाः शुभवर्धनाः ॥ ५८ ॥
इन्द्रज्ञानः स्फुरज्ज्ञानः सहजज्ञानसंज्ञकः ।
सद्बुज्ञानाभिधः साधुस्तथा कल्याणदर्शनः ॥ ५९ ॥
पण्डिताः पर-मा-नान्ताः एते मर्त्येशसत्कृताः ।
देवा इव त्रयस्त्रिंशत्सुधर्माचारदर्शिनः ॥ ६० ॥

( षड्भिः कुलकम् )

उदयप्रभनामानः पण्डिताः सुन्दरप्रभाः ॥
आगमप्रभसद्भावलाभेन्द्राऽजितलाभकाः ॥ ६१ ॥
एतेऽदर्पक-ला-भान्ताः षड्दर्शनसुरा इव ।
पुण्योपदेशतः क्लृप्तस्वात्मदर्शनदीप्तयः ॥ ६२ ॥

( युग्मम् )

श्रीविमलधर्मसारादिमधर्मौ चन्द्रधर्मजयधर्मौ ।
सिद्धान्तधर्मसुतिलकधर्मभुवनधर्मनामानः ॥ ६३ ॥
चारित्रधर्मसदऽमरधर्माऽजितधर्मकमलधर्माख्याः ।
गुणधर्मकनकधर्मौ सुमतेः संवेगतो नेमी ॥ ६४ ॥
श्रीसर्वसोमा वरशान्तिसोमाः श्रीशीलसोमा उदयादिसोमाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धान्तसोमा विजयादिसोमाः सद्धर्मसोमास्तिलकादिसोमाः ६५
शुभसोमराजसोमाऽभयसोमा भुवनसोमकुलसोमौ ।
लाभसोमेन्द्रसोमौ सत्यागमसंयमौ यमिनौ ॥ ६६ ॥
शिवहेमसारहेमौ जिनजयहेमौ च भद्रहेमाख्यः ।
संवेगरत्नहेमौ शान्तिक्षेमा जयक्षेमाः ॥ ६७ ॥
विश्वदेवा इवामीषु तेजःपात्रं त्रयोदश ।
बुधाः शेषा भवन्त्वेवं[२८] समेऽमान्ताः क्षमाश्रयः ॥ ६८ ॥

( षड्भिः कुलकम् )

श्रीविनयप्रियसारप्रियागमप्रियजिनोदयाः सदयाः ।
हर्षोदयरत्नोदयभुवनोदयनामधेयाश्च ॥ ६९ ॥
साधुमाणिक्यविबुधाः श्रुतमाणिक्याश्च सूरमाणिक्यः ।
समयमाणिक्यसंज्ञाः सज्ज्ञानानन्दमाणिक्यौ ॥ ७० ॥
सुमतिमाणिक्यनामा सुराजमाणिक्यसर्वमाणिक्यौ ।
सत्सुमतिसत्यसुन्दरसत्यौ कल्याणसत्यश्च ॥ ७१ ॥
रत्नजयास्तीर्थजयाः सिद्धान्तजयाश्च तिलकजययतयः ।
अजिताभयकनकजयः कुलोदयेन्द्रोदयौ सनयौ ॥७२॥
साधुविजयः शिवविजयाः सजयाश्चारित्रविजयजिनविजयाः ।
रत्नविजयसर्वविजयविवेकविजयेन्द्रविजयाश्च ॥ ७३ ॥
महोमया इमेऽयान्ताः पण्डिता अहितच्छिदे ।
षट्त्रिंशद्दण्डशस्त्राभा गणनायकचक्रिणः ॥ ७४ ॥

( षड्भिः कुलकम् )

धर्मसुन्दरचारित्रसुन्दरास्तीर्थसुन्दराः ।
विजयात् सुन्दरा विज्ञधराः समयसुन्दराः ॥ ७५ ॥
सिद्धान्तसुन्दराश्चापि चरणोदयसुन्दरौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्षाः सुमतिसाराख्याः सोमसारेन्द्रसारकौ ॥ ७६ ॥
सज्ञानधीरसंज्ञा विज्ञाश्चारित्रधीरशिवधीराः ।
हेमादिमधीराऽभयधीरसुमतिधीरकुलधीराः ॥ ७७ ॥
आनन्दधीरविबुधाः शुभवीराश्चन्द्रवीरशिववीराः ।
जयवीरश्रुतवीराजितवीरास्तदनु कुलवीराः ॥ ७८ ॥
आनन्दाच्चारित्रा आगमचारित्रपण्डितप्रवराः ।
सहजचारित्रनामा चरणाच्चन्द्रः सहजचन्द्रः ॥ ७९ ॥
श्रीसोमभद्रसारादिमभद्रज्ञानभद्रनामानः ।
श्रीसिद्धान्तसमुद्राः समयसमुद्राभिधानाश्च ॥ ८० ॥
सन्नेमिशेखरा राजशेखराभयशेखरौ ।
सुमतेः शेखरः साधुस्तथा भुवनशेखरः ॥ ८१ ॥
भुवनात्सागराऽऽराव: श्रीमच्चरणसागराः ।
नयाभयागमेभ्यश्च सागराः सोमसागराः ॥ ८२ ॥
रत्नसूरा वचःसूरा जिनसूरा जितस्मराः ।
सर्वसूराः शुभात्सूराश्चन्द्रसूराश्च पण्डिताः ॥ ८३ ॥
द्विपञ्चाशदमी एवं सदा-रान्ता जगन्नताः ।
श्रीगणाधीशशुश्रूषापरा वीरसुरा इव ॥ ८४ ॥

( दशभिः कुलकम् )

श्रीसोममङ्गला हेममङ्गला धर्ममङ्गलाः ।
शुभशीलाः सुसंवेगशीलाश्च ज्ञानशीलकाः ॥ ८५ ॥
चारित्रशीला वरसूरशीलाः सौभाग्यशीला इह नन्दिशीलाः ।
सद्भावशीला अथ शीलशब्दः पुरो जिनेन्द्रागमसुन्दरेभ्यः ॥८६
तीर्थकुशलजिनविमलौ शुभविमलः पटुवचाश्च कुलकमलः ।
अभयाच्छुभतः कीर्तेर्विशालशब्दस्तथा विबुधाः ॥८७॥

तिथिवत्प्रतिपन्मुख्या एषु पञ्चदशाऽपरे ।
सप्तर्षिवदपङ्काङ्गा लान्ता द्वाविंशतिः समे ॥ ८८ ॥

( चतुर्भिः कलापकम् )

आनन्ददेवा अथ तीर्थदेवा धनादिदेवाः कनकादिदेवाः ।
श्रीचन्द्रदेवाऽमरदेवलक्ष्मीशिवाश्च संवेगशिवाः शिवाङ्काः॥८९॥
श्रीमच्चन्द्रयशःकुलयशःकमलकलशकनककलशाख्याः ।
विबुधा इमे वशान्ता रवय इव द्वादशोदयिनः ॥ ९० ॥

( युग्मम् )

श्रीउदयहर्षलक्ष्मीहर्षविजयहर्षहंसहर्षाख्याः ।
शिवहर्षशीलहर्षाः सुनेमिहर्षाश्च कृतहर्षाः ॥ ९१ ॥
सज्ञानहर्षनामानस्तथा कनकहर्षकः ।
क्षमोद्भवा अमी-षान्ता विबुधा निधिवन्नव ॥ ९२ ॥

( युग्मम् )

श्रीमत्संयमहंसाः सुरत्नहंसा विवेकहंसाश्च ।
सल्लब्धिहंसलक्ष्मीहंसाः सिद्धान्तहंसवराः ॥ ९३ ॥
अथ शीलहंसनन्द्यादिमहंसौ शान्तिचरणहंसौ वा ।
श्रुतहंसाभयहंसौ सुन्दरहंसश्च कुलहंसः ॥ ९४ ॥
जडध्याश्रयनिर्मुक्ता रत्नानीव चतुर्दश ।
सदाऽप्रान्ता बुधा एते सुमनःसुखदायिनः ॥ ९५ ॥

( त्रिभिर्विशेषकम् )

विबुधा आगमतीर्थास्तथा कमलधीरकनकसौभाग्यौ ।
लावण्यादी भूषणभद्रौ चारित्रमाणिक्यः ॥ ९६ ॥
ध्यादिद्वादशपर्यन्तयत्यार्यासंयुतान् बुधान् ।
ये पर्यधापयन्नेवं सर्वानत्रिंशतीमितान् ॥ ९७ ॥

येषां सुधामुचं वाचं श्रुत्वैते सपरिच्छदाः ।
रत्नाद्यैरास्तिकैः कैश्चित् प्रायेण परिधापिताः ॥ ९८ ॥

श्रीश्रामण्यं सहस्रानुमिततनुमतां विन्नवाचंयमाना-
माचार्यत्वं नवानां तदनु तिथिमितिर्व्यापिनां वाचकत्वम् ।
एकार्यायाश्च माहत्तरपदमपि यैरर्पितं पण्डितानां
गण्यादीनां पदानां नहि परिगणना स्यात् स्वयं स्थापितानाम् ९९

अभिकृतिशतमानागमगुणनपराः प्रत्यहं प्रमादहराः ।
बभुरिह लक्ष्मीसागरसूरीशास्ते युगप्रवराः ॥ १०० ॥

श्रीमन्मालवमेदिनीन्दुवदनालङ्कारहारप्रभो-
रुग्रामागरवासिकर्मतनयश्रीरत्नसङ्घप्रभोः ।
आक्षेपाद्विधुवेदवष्र्मवसुधावर्षे सुभिक्षोद्भवे
लक्ष्मीसागरसूरिराजविलसद्भाग्यप्रकर्षस्तवे ॥ १०१ ॥

श्रीजम्बूसमसोमसुन्दरगुरोः श्रीसोमदेवाह्वयः
शिष्यः सूरिवरश्च शिष्यवृषभश्चारित्रहंसोऽस्य यः ।
तस्य श्रीत्रिबुधस्य शिष्यशिशुना काव्ये मुदा निर्मिते
सर्गोऽत्र प्रथमेतरो गुरुगुणाद्रत्नाकराख्यायुते ॥१०२॥

इति परमगुरुलक्ष्मीसागरसूरीणां गच्छनायकपदवीप्राप्तिगच्छ-
मेलगच्छपरिधापनिकादिविधानगर्भो गुरुगुणरत्नाकरनाम्नि
काव्ये द्वितीयः सर्गः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम्

# अथ तृतीयः सर्गः।

श्रीगूर्जरत्राऽमरमालवेषु यै-
राधायि या श्राद्धकृतोद्धवोच्चयैः।
विम्बप्रतिष्ठादिककार्य्यमालिकां
वच्मि क्रमात्तामथ चित्रकारिकाम् ॥ १ ॥
भट्टारकाः केऽपि पदादिकं यदाऽऽ-
देशादकार्षुर्वृषकृत्यमुत्सवैः।
यात्रा च केचिच्च महर्धिकाऽऽस्तिका-
यद्वारके यत्तदपि ब्रुवे कियत् ॥ २ ॥
( युग्मम् )

अत्र प्रथममुकेशज्ञातीयसाह०साह्वविहितविस्तरः प्रोच्यते-

प्रासादसौधर्द्धिविधूतताविष-
च्छायाभरे श्रीगिरिपूर्वके पुरे।
श्रीसोमदासावनिजानिमन्त्रिणा
धर्मिष्ठधुर्येण च साह्वसाधुना ॥ ३ ॥
खैंक्षिक्षमामानमणोरुपित्तला
निर्मापिता या जिनमूर्तिरुज्ज्वला।
तस्याः परस्या अपि बिम्बसन्तते-
श्चक्रे प्रतिष्ठा प्रथमं महेन यैः ॥ ४ ॥
( युग्मम् )

अथ दक्षणीयसाहमहादेवविस्तरः-

श्रीदेवगिर्याह्वमहापुरादिहाऽऽ-
गत्याऽतिभक्त्या प्रणिपत्य तीर्थपान्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शत्रुञ्जयादौ सुगुरून् पुनर्महा-
देवाऽभिधेनेभ्यवरेण साधुना ॥ ५ ॥
लाटादिपल्ल्यां प्रथिते पृथुक्षणे
प्रभूतपुंसां पटटङ्कार्पणे ।
श्रीसोमदेवाह्वयसूरिशोभितैः
पूज्यैस्ततो यैः शतशो यतैर्वृतैः ॥ ६ ॥
श्रीमत्सुधानन्दनहेमहंसयोः
सद्वाचनाऽऽचार्यशिरोऽवतंसयोः ।
प्रसादिता वाचकता तदोदया-
च्चूलागणिन्याश्च महत्तरापदम् ॥ ७ ॥
( त्रिभिर्विशेषकम् )

अथ मण्डपीयसं०चांदाराचितविस्तरः–
हाडावटीमालवदेशनायक-
प्रजाप्रियाऽहम्मुदमुख्यमन्त्रिणा ।
श्रीमण्डपक्ष्माधरभूमिवासिना
सङ्घाधिनाथेन च चन्द्रसाधुना ॥ ८ ॥
द्वासप्ततिर्दारुमया जिनालया-
रीरीचतुर्विंशतिपट्टराजिताः ।
ये कारिता मङ्गलदीपकादिषट्-
त्रिंशत्प्रमाणोपकृतिश्रियाऽऽश्रिताः ॥ ९ ॥
प्राग्वाटवंशोदधिपार्वणेन्दुना-
ऽमुना चतुर्लक्षचतुष्कलव्ययात् ।
पुण्यैकचित्ताऽमिताऽऽस्तिकास्तिकी-
पङ्क्तेर्दुकूलाभरणादिदानतः ॥ १० ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्लृप्ते गरीयस्तरविस्तरे तत-
स्तेषां प्रतिष्ठा यतिपैरकारि यैः ।
श्रीमत्सुधानन्दननामवाचक-
प्रभोरनूचानपदं च तत्क्षणे ॥ ११ ॥
( चतुर्भिः कलापकम् )

अथ मन्त्रिगदाकृतप्रथमविस्तरः–

अहम्मदावादपुराधिवासिना
सोऽङ्गीत्रिके श्रीगदराजमन्त्रिणा ।
त्रिंशत्सहस्रद्रमटङ्कविक्रयाद्
यत् कारितं नूतनजैनमन्दिरम् ॥ १२ ॥
श्रीसोमदेवाह्वयसूरिभिस्तत-
स्तत्राऽऽर्हती मूर्तिततिः प्रतिष्ठिता ।
ददे यदादेशमथाप्य सोत्सवं
श्रीवाचकत्वं शुभरत्नसाधवे ॥ १३ ॥
आशादिपल्लीपुरि मञ्जुले महे
महेभ्यरा मण्डनमङ्कमण्डिते ।
प्रवर्तिनीनाम्नि पदे पुनस्तदा
तैः सोमलब्धिर्गणिनी निवेशिता ॥ १४ ॥
( त्रिभिर्विशेषकम् )

अथ मालवीयसं०सूरावीराविरचितविस्तरः–

श्रीग्यासदीनावनिभुग्नियोगिनौ
महर्द्धिकौ मण्डपदुर्गवासिनौ ।
श्रीसूरवीरौ कृतिनौ सुदानिनौ
प्राग्वाटमुख्याविह यौ यशस्विनौ ॥ १५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यैर्गच्छराजैर्घनसङ्घसंयुतौ
साकं सुधानन्दनसूरिभिश्च तौ ।
सिद्धाचलादौ जिनपूजनोद्यतौ
ग्रामं क्रमादुम्बरहट्टमागतौ ॥ १६ ॥
पर्यङ्किकातूर्यगुरूदरस्फुर-
त्तुरङ्गयुग्यव्रजजातडम्बरम् ।
किं पार्थिवः कोऽपि महानिहागमद् ?
यत्सङ्घमीक्ष्येति जनस्तदाऽवदत् ॥ १७ ॥
ताभ्यां महेभ्याद्भुतकारिणि क्षणे
तत्राऽप्रमाणैर्द्रविणैर्विनिर्मिते ।
यैरर्पिता श्रीशुभरत्नवाचक-
स्याऽऽचार्यसम्पत् प्रमदप्रदायिनी ॥ १८ ॥
श्रीपातशाहेः फरमाणमाप्य तौ
श्रीतीर्थयात्रामथ च प्रचक्रतुः ।
लक्षाधिकार्थव्ययतः सविस्तरं
निरन्तरायं यदुरुप्रसादतः ॥ १९ ॥
( पञ्चभिः कुलकम् )

अथ दाक्षिणात्यसं० धनराजनगराजजनितक्षणः—

श्रीदेवगिर्याः समुपेत्य गूर्जर-
क्षोण्यामगण्याढ्यनृणां शिरोमणिः ।
श्रीधन्यराजो नगराजबन्धुयुग्
यान् नंनमीति स्म यतीश्वरान् मुदा ॥ २० ॥
श्रीमन्महिम्मूदमहीपतेर्महो-
पदाप्रदानाद् बहुमानमासदत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सहर्षं चकृवांश्चतुर्ष्वसौ
तीर्थेषु यात्रां विमलाऽचलादिषु ॥२१॥
श्रीपत्तनेऽस्मिन्नणहिल्लपाटके
प्रावृट्चतुर्मासकमेष तस्थिवान् ।
अबूभुजद् भानुमितार्धसंयुत-
ज्ञातीनभीष्टैरशनादिभिस्तथा ॥२२॥
कौशेयवासःकनकादिनाणकै-
स्ताम्बूलदानाद् बहुशः सुदृग्विशाम् ।
निर्माय निर्मानमहं दृढाऽऽग्रहं
येषां पुरस्ताद् धनराजसङ्घराट् ॥ २३ ॥
सूरेः पदं सोमजयाह्ववाचक-
स्याऽकारयद् यत्करपङ्कजेन यः ।
यदन्तिषच्छ्रीजिनसोमपण्डित-
प्रभोरुपाध्यायपदं च पत्तने ॥ २४ ॥
श्रीधन्यराजो नगराजसङ्गतः
स दक्षिणीयोऽपि कृतार्थिकामितः ।
लक्षाधिकैस्तत्र सुवर्णटङ्ककै-
र्दृष्टस्तदाऽहो ! घनकान्तिरुच्चकैः ॥ २५ ॥
( षड्भिः कुलकम् )

अथ सं०गदाकस्य द्वितीयः प्रथीयःक्षणः–

श्रीगूर्जरज्ञातिवणिग्वराग्रणी-
मन्त्री सुरत्राणसुखक्ष्माभृताम् ।
विज्ञो वदान्यो विनयी नयी बृह-
त्पुण्यप्रथा जैनमतप्रभावकः ॥ २६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्व्याजवृत्त्या बहुवत्सरावधि
श्रीपाक्षिकां प्रत्युपवासकृच्च यः ।
तत्पारणे द्वित्रिशताऽऽस्तिकावले-
र्वात्सल्यकारी गदराजसङ्घराट् ॥ २७ ॥

व्योमेक्षणक्ष्मामणरीतिपिण्डितं
बिम्बं स नाभेयविभोरबीभरत् ।
तत् प्रापयत् चार्बुदभूध्रभूषणे
भैमे विहारे बहुवित्तविक्रयात् ॥ २८ ॥

आसाद्य सद्यः फरमाणमुर्वरा-
राजस्य यात्राकरणार्थमुत्सुकः ।
परःसहस्रैर्नृभिरर्वभिः परः-
शतैः स्वनःसप्तशतैश्च शोभितम् ॥ २९ ॥

विचित्रवाद्यारवगर्जदम्बरं
श्रीसङ्घमादाय सुखप्रयाणकैः ।
श्रीभानुलक्षादिमहीन्द्रसत्कृतः
प्राप क्रमादर्बुदपर्वतं स तम् ॥ ३० ॥

रैटङ्कलक्षव्ययतोऽनणीयसः
सङ्घस्य मिष्टान्नपटादिदायिना ।
तस्योपरिष्टाद् धनिविस्मयावहे
महे महेभ्येन तु तेन मण्डिते ॥ ३१ ॥

तत्रेत्य यैः सोमजयाख्यसूरिभिः
सत्रेषु नेत्रेन्द्रियचन्द्रहायने ।
सा मूर्तिरर्चा अपराश्च भूरिशः
प्रतिष्ठिता भैमजिनौकसि स्थिताः ॥ ३२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सुधानन्दनसंज्ञसूरिभि-
र्दत्ताऽनुमत्या च गदाऽऽग्रहात् तदा ।
प्रसादिता श्रीजिनसोमवाचक-
स्याऽऽचार्यता यैर्गणपैः स्वपाणिना ॥३३॥

अथात्रैव सा०डुङ्गर-सं०सांडाकृतमहः-

श्रीपत्तनादेत्य बृहद्वृषावली-
विधायिसाधारणसाधुसूनुना ।
श्रीडुङ्गरेण प्रथिते क्षणेऽर्पितं
यैर्वाचकत्वं जिनहंससद्गुरोः ॥ ३४ ॥
संडाऽऽस्तिकेनार्बुदवासिना पुनः
प्रौढे प्रणीतेऽत्र धनैर्घनैर्महे ।
प्रादाय्युपाध्यायपदं सुपण्डिते-
शितुः सुमत्यादिमसुन्दरस्य यैः ॥ ३५ ॥
स्वं मन्यमाना गदराजडुङ्गर-
श्रीसंडकेभ्याः सफलं जनुस्ततः ।
श्रीजीरपल्लिप्रभुपार्श्वतीर्थकृ-
द्यात्रामकार्षुः कुशलेन सोत्सवम् ॥ ३६ ॥
( एकादशभिः कुलकम् )

अथाहम्मदावादीयहर्म्यद्वारिकप्राग्वाटसं०कर्मण-दो०महि-
राज-दो०हेमादिविस्तरः-

श्रीतीर्थयात्रागुरुपुण्यकारिणा
श्रीकर्मणाऽऽख्येन महीपमन्त्रिणा ।
महीसमुद्राभिधपण्डितप्रभोः
प्रादाय्युपाध्यायपदं विवेकिना ॥ ३७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शत्रुञ्जये यो दशभिर्जिनालयै-
यात्राविधायी गुणराजसङ्घराट् ।
पौत्र्या कपूर्राह्वयया तदीयया
तत् कारितं लब्धिसमुद्रसद्व्रतेः ॥ ३८ ॥
निर्दम्भमर्हद्गुरुभक्तिभावितः
साध्वन्वये यः प्रचुराऽऽज्यदः सदा ।
तेनैतदेवामरनन्दिपण्डित-
स्याऽकारि श्रीमन्महिराजसाधुना ॥ ३९ ॥
श्रीपुण्डरीकं कृतवान् नवोत्सवै-
र्यात्रा द्विशोऽब्दं प्रति सङ्घयुग् यकः ।
जिनादिमाणिक्यगणिप्रभोरदः
सहेमधन्यादिपतिर्व्यधापयत् ॥ ४० ॥
चतुर्भिरेभिः श्रमणैः पृथक् पृथक्
पृथक्स्मत्र वेषपुरे नरेश्वरैः ।
न्यायार्जिताऽन्यूनधनैरहम्मदा-
वादादुपेत्य न्वभिनुत्य यान् प्रभून् ॥ ४१ ॥
एषां चतुर्णां व्रतिनां तपःक्षमा-
चातुर्यविद्यादिगुणाश्रितात्मनाम् ।
तदाग्रहात् सोमजयाह्वसूरिभिः
साकं यकैर्वाचकता समर्पिता ॥ ४२ ॥
( षड्भिः कुलकम् )

अथ सं०स्वीमा–सं०कुन्ता–कृतविस्तरः–

सौवश्रिया स्वर्गपुरीं जिगाय या
जिनालयव्याजवशात् ततः स्वकान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौवर्णकुम्भध्वजराजिराजितान्
यस्या विमानानुपदीचकार सा ॥ ४३ ॥
सीरोहिकायां पुरि तत्र चित्रकृ-
द्धर्मिष्ठधन्याऽऽस्तिकधोरणीधृति ।
दीनाऽऽदिदेहिप्रकरोपकारकः
खीमाऽभिधः सङ्घपतिः समस्ति यः ॥४४॥
निष्पादिते तेन महे महात्मनां
वात्सल्यवर्याम्बरदानपूर्वकम् ।
यैर्गच्छराजैर्जिनहंसवाचकं
प्रति स्वयं सूरिपदं प्रसादितम् ॥ ४५ ॥
सुंडाककाभिख्यपुरादुदारधीः
कुन्ताऽभिधः सङ्घविभुः श्रियाऽर्हताम् ।
यात्रादिपुण्यैकपटुर्द्रुपाययौ
योऽत्र स्वपुत्र्याः सुविवाहहेतवे ॥४६॥
द्वात्रिंशताऽसौ सह रिक्किकाव्रतै-
स्ताम्बूलनिर्माणपुरस्सरं सताम् ।
येषां पुरस्तादतिमात्रमाग्रहं
विरच्य रुच्यं च महं महीयसम् ॥ ४७ ॥
श्रीसोमदेवव्रतिनेतुरन्तिष-
न्मुख्यस्य मत्याऽनुकृतद्युसद्गुरोः ।
श्रीमत्सुमत्यादिमसुन्दरस्य यै-
राचार्यतामर्पयति स्म विस्मितः ॥ ४८ ॥
( षड्भिः कुलकम् )

अथाऽकमीयसो०ईश्वरपताप्रथितविस्तरः–

ख्यातः सना तीर्थजिनेन्द्रवन्दना-

दानाद्यनण्याऽनणुपुण्यकर्मभिः ।

य ईश्वरः श्राद्धवरः पताऽभिध-

भ्रातृश्रितो भूरिधनैरकारयत् ॥ ४९ ॥

आसादमुच्चैरिलदुर्गपर्वतो-

परिप्रसादादिह भानुभूपतेः ।

अवतिष्ठितं तद्विहितेऽद्भुते महे-

ऽजितेशबिम्बं बहुबिम्बयुक् च यैः ॥ ५० ॥

अथ को०श्रीपालकलितमहः–

यः प्रौढिमान् भानुनरेशधीसखः

श्रीपालसाधुः सुकृतार्जनोन्मुखः ।

ऊकेशवंशेन्दुरियद्दरस्थित-

स्तपागणे वेषसमर्पणे रतः ॥ ५१ ॥

स्वीयश्रिया तेन विधाय सूद्भवं

यत्पाणिना सूरिपदं प्रदापितम् ।

श्रीमत्सुमत्यादिमसाधुपण्डिते-

शितुः सुधीसाधुगुणोच्चयाम्बुधेः ॥ ५२ ॥

( युग्मम् )

अथोकेशज्ञातीयसो०पतासो०हरिश्चन्द्रसचितक्षण:–

पदप्रतिष्ठादिविधायकः स्वयाऽऽ-

ढ्या श्रिया चाऽकमियोऽजनीश्वरः ।

भ्राता लघुस्तस्य पताढ्यस्तु यः

सुतो हरिश्चन्द्र इतीह विश्रुतः ॥ ५३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताभ्यां कृतिभ्यां महति क्षणे कृते
दत्त्वाऽऽशु ये वाचकतां पृथग्महम् ।
राजप्रियायाऽदुरथेन्द्रनन्दये
द्वाभ्यां सुधीभ्यामिति सूरिसम्पदम् ॥ ५४ ॥
( युग्मम् )

अथ मं०मेघमहः–

श्रीधर्महंसस्य बुधस्य वाचक-
श्रीरिन्द्रहंसस्य च यैः समर्पिता ।
अत्याऽऽग्रहाद् रम्यमहादहम्मदा-
वादीयमर्त्याग्रिममेघमन्त्रिणः ॥ ५५ ॥

अथ ऊ०सा०जीवाविहितविस्तरः–

प्रह्लादनाद् येऽत्र पुरे निवासकृद्
यः खीमसूनुर्वितनोति सन्ततम् ।
श्रीतीर्थयात्रादिवृषान् सुखेच्छया
जीवाह्वयः साधुरनर्गलश्रिया ॥ ५६ ॥
निशम्य सम्यग् यदुदारदेशनां
तेनानगारावलिवेषदायिना ।
क्लृप्ते महे वाचकता मुदा ददे
श्रीपण्डितायाऽऽगममण्डनाय यैः ॥ ५७ ॥
( युग्मम् )

अथ को०सायररचितविस्तरः–

मन्त्रीशिता भानुनृपस्य सुक्रिय-
व्रतिप्रियप्राज्यकुटुम्बबन्धुरः ।
यः सायरस्तेन कृते महेऽर्पितं
यैर्वाचकत्वं गुणसोमसद्गणेः ॥ ५८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सं० धनाजनितक्षण:–

प्रत्यब्दयात्राकरहेमसूनुना
धनाभिधेनेभ्यवरेण साधुना ।
अनन्तहंसस्य मनीषिशेखर-
स्याऽदापि यैर्वाचकता सविस्तरम् ॥ ५९ ॥

अथाऽऽशापल्लीयप० जूठामउठाकृतविस्तर:–

समग्रगीतार्थसुवेषदायका-
जूठादयो ये पटुहंसनन्दनाः ।
तैर्विस्तरे चारुतरे कृते ददे
यैर्वाचकत्वं बुधसङ्घसाधवे ॥ ६० ॥
सूरित्रयं वाचकषट्कमित्यदः
संस्थापितैर्यैरिलदुर्गपत्तने ।
प्रवर्तिनीनां पुनरष्टकं तदा
क्षणैस्तदप्याढ्यकृतैः पृथक् पृथक् ॥ ६१ ॥

अथ प्रा० को० ऊजलकाजाकृतविस्तर:–

प्रभूतिविश्वाद्भुतपूरुषोद्भवा
प्राज्ञप्रजाप्रक्रियमाणसूत्सवा ।
नानाजिनावासविमानजित्वरी
या राजते राजगृहप्रभा पुरी ॥ ६२ ॥
सीरोहिकायामिह वासिनौ सना
लक्षक्षमानेतुरमात्यपुङ्गवौ ।
शत्रुञ्जयादावतिविस्तरेण यौ
यात्राकृतेः सङ्घपती च राजतः ॥ ६३ ॥
सदैव लोगस्सशतद्वयीतनू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्सर्गोद्यतौ त्रिर्जिनपूजने रतौ ।
यौ द्विष्प्रतिक्रान्तिमुखक्रियाकृतौ
गृहीतपक्वान्नगुडादिनिश्चयौ ॥ ६४ ॥
श्रीसोमदेवैः सह सूरिभिः पुरा
यौ जीरपल्ल्यां जिनपार्श्ववन्दनम् ।
अकारिषातामिह सप्त वासरान्
महेन यावत्करमोचनादिना ॥ ६५ ॥
यौ दुर्गतेभ्ये वा वणिजां सुधर्मिणां
धान्यादिदानैः प्रतिमन्दिरं मुदा ।
नित्यं निजौकस्यनिवारजेमना-
ऽच्छअदमदौ मारवमुख्यभूस्पृशाम् ॥ ६६ ॥
दुर्भिक्षखिन्नेषु जनेषु शम्बला-
र्पकौ प्रयात्सु प्रति मालवान् यकौ ।
कृपाऽऽकुलौ रङ्ककुलेषु वत्सलौ
पञ्चप्रमादैरकलङ्कितौ कलौ ॥ ६७ ॥
यौ जीर्णजैनेश्वरमन्दिरोद्धृति-
व्यापारधुर्यौ नयसञ्चितैर्धनैः ।
पर्वादिनीष्टत्सु च पञ्चसेरक-
प्रमाणखण्डापुटलम्भने पटू ॥ ६८ ॥
ताभ्यां स्वपुर्युज्ज्वलकार्यकाभिधा-
भ्यामास्तिकाभ्यामभिनम्य बोधिदान् ।
चतुर्युताशीतिमितार्यदम्पती-
भिः सार्धमन्यैरपि धन्यमानवैः ॥ ६९ ॥
यः शिष्यराट् सोमजयाख्यसूरिवा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्सुधां मनोहृत्य निपीय निस्समाम् ।
ऊरीकृतं तद्वदनाम्बुजन्मना
ब्रह्मव्रतं राजसमाजसाक्षिकम् ॥ ७० ॥
परःसहस्रैरिह रूप्यटङ्कै-
स्ताम्बूलदानेन सतां तनूमताम् ।
ताभ्यां महेभ्यावलिविस्मयावहः
कीर्तिप्रसक्तिर्विहितस्तदा महः ॥ ७१ ॥
( दशभिः कुलकम् )

अथ सं०सहसावि०महः-

यः कुम्भकर्णादिमहीशसत्कृतः
सङ्घाधिनेता धरणाभिधः सुधीः ।
चतुर्मुखं चैत्यमचीकरद् जना-
श्चर्यावहं राणपुरान्तरार्हतम् ॥ ७२ ॥
श्रीरत्नसिंहः प्रथमः सहोदर-
स्तस्याऽभवद् यः सुकृताम्बुसागरः ।
तस्याऽऽत्मजः सालिगनामसङ्घराड्
यो वंशवाले जिनसौधकारकः ॥ ७३ ॥
दानादिपुण्याचरणे परायण-
स्तस्योद्वहः श्रीसहसाह्वयोऽस्ति यः ।
श्रीग्यासदीनेन कृतश्च मालवा-
धीशेन धर्माधिकधीसखाग्रणीः ॥ ७४ ॥
पुण्योपदेशं सुमतिस्थसुन्दरा-
चार्येश्वराणां हृदये निधाय सः ।
नातिक्रमन् पूर्वजमार्गमुत्तमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यायार्जितैर्नैकहिरण्यराशिभिः ॥ ७५ ॥
लक्षक्षमापत्यनुमत्यवाप्तितः
श्रीअर्बुदोच्चाऽचलदुर्गशृङ्गके ।
प्रासादमुत्तुङ्गमकारयच्चतु-
र्मुखं मरुद्धाममुषं विभूषया ॥ ७६ ॥
स्वकारितं रीतिखदृक्क्षमामणैः
पूर्णं यदेकं जिनबिम्बमुज्ज्वलम् ।
तच्चान्यदर्चात्रयमत्र तत्समं
संस्थापयामास यकैः प्रतिष्ठितम् ॥ ७७ ॥
( षड्भिः कुलकम् )

अथ मण्डपीयसं०वेलादिरचितोत्सवः-

श्रीसुमतिसुन्दराणामाचार्याणां निशम्य मधुरगिरम् ।
वेल्लाकः श्रद्धालुर्विशेषसुकृतैकरसिकोऽभूत् ॥ ७८ ॥
जिनयात्राकरणमनाः सपदिसुरत्राणदत्तफरमाणः ।
व्यवहारिव्रजमञ्जुलतमं समादाय सङ्घमसौ ॥ ७९ ॥
यावन्मण्डपदुर्गाद् रतलामद्रङ्गमागमद् रङ्गात् ।
तावत् तत्र ससङ्घा धन्या अन्ये घना मिलिताः ॥ ८० ॥
यच्छिष्यसुमतिसुन्दरसूरिभिराधायि सङ्घपतितिलकः ।
वेल्लादीनां लक्ष्मीवतां द्विपञ्चाशतस्तदनु ॥ ८१ ॥
वर्णा इव के व्यञ्जनगात्राः केचित् स्वराश्च बिन्दुयुताः ।
मात्राश्रितास्तदा कति पत्रस्था वर्णितास्तज्ज्ञैः ॥ ८२ ॥
पृथक् पृथग् वात्सल्यं सत्सु दुकूलादिभिश्च ताम्बूलम् ।
निर्मायाऽमी निखिलाः क्रमादितः प्रापुरिलदुर्गम् ॥८३॥
प्रतिपाद्य स्नात्रमहं प्रतिजिनमन्दिरमिह ध्वजारोपम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुदिता ववन्दिरे ते यान् गुरुराजान् सवैनयिकम् ॥८४॥
परदेवाह्वार्यमहामहार्तिहर्ता तथेष्टसुखकर्ता ।
श्रीआश्वसेनिरधुना प्रभुरास्ते जीरपल्लिपुरे ॥ ८५ ॥
तत्प्रथममस्य यात्रा क्रियते मत्वेति सङ्घपतयस्ते ।
गत्वाऽऽशु तत्र नेमुस्तं वामेयं गुणामेयम् ॥ ८६ ॥
रचयन्ति स्म विचित्रानत्र महांस्ते मुदेन्द्रमालां च ।
गुणराजसङ्घराजः स्वाढ्यशतैः पर्यधाद् बहुभिः ॥ ८७ ॥
नवभिष्टङ्कसहस्रैरर्बुदतीर्थे तथैव वेल्लाकः ।
इन्द्रस्रक्परिधाता सद्वात्सल्यादिकर्ताऽऽसीत् ॥ ८८ ॥
राणपुरेऽथ चतुर्मुखचैत्ये वेल्लाकधर्मसिंहाद्याः ।
देवकुलिका अनेकाः कृतोत्सवाः कारयाञ्चक्रुः ॥ ८९ ॥
तदनु तदानीं सिद्धक्षेत्रादावर्हतः समभ्यर्च्य ।
इलदुर्गे पुनरेत्य प्रणता गणतायिनस्तैर्ये ॥ ९० ॥
वेल्लाकेन च वर्धापिताः सुवर्णादिनाणकैर्गुरवः ।
परिधापिताः शतत्रयमितसंयतपरिवृता वेषैः ॥ ९१ ॥
तेनैव सोमसागरगणेस्तदा यैरदायि विबुधपदम् ।
पावकशैले शम्भवनाथमथानम्य सङ्घेशाः ॥ ९२ ॥
हृदि निर्वृतिमन्तस्ते मालवनीवृति निजालयानाऽऽपुः ।
देवाह्वानाद्युत्सवमपि व्यधुर्मण्डपे केऽपि ॥ ९३ ॥
( षोडशार्याकुलकम् )

अथ सं० धर्मसिंहकृतविस्तरः–

आकार्य सुमतिसुन्दरसूरिवरान् सोत्सवेन विनयेन ।
धर्म्येऽन्यधर्मसिंहः प्रक्लृप्तवान् पिप्पलीयपुरे ॥ ९४ ॥
देवाह्वानकपञ्चम्युद्यापनमुख्यमप्रमेयमहम् ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

अयुताधिकस्वसारव्ययाद् रयात् सङ्घभक्तिविधौ ॥ ९५ ॥

( युग्मम् )

अथ सं० भादाआनाजनितमहः-

देवासपर्युपासकवर्यौ यौ भद्रकानकाभिख्यौ ।
कृतवन्तावुद्यापनजिनप्रतिष्ठादिनैकमहान् ॥ ९६ ॥
ताभ्यां पुनरारेभे परिधापनिका गणे हि वरवेषैः ।
यच्छिष्यसुमतिसुन्दरसूरिवचःसौधरसपानात् ॥ ९७ ॥

( युग्मम् )

अथाऽत्रैव पुरे सं०-देवसीप्रथितविस्तरः-

प्राग्वाटपुरुषरत्नं माफरमलिकस्य मान्यमन्त्रीशः ।
श्रीदेवसिंहसुकृती गणस्य वेषार्पणप्रवणः ॥ ९८ ॥
चन्द्रोदयादिपञ्चत्रिंशत्प्रमितोपकृत्युपेतान् यः ।
देवालयान् नवीनानकारयत्तीर्थकृत्संख्यान् ॥ ९९ ॥
तेषु चतुर्विंशतिजिनपट्टान् पित्तलमयांश्च बहुवित्तैः ।
सङ्घांशुकादिदानैर्महामहं मण्डयित्वा च ॥ १०० ॥
कारयति स्म स तेषां ततः प्रतिष्ठां यदन्तिषत्प्रष्ठैः ।
आगममण्डनवाचकपादैर्दत्तोत्तमानन्दैः ॥ १०१ ॥

( चतुर्भिः कलापकम् )

अथ सा० मेघाजीवणजनितविस्तरः-

श्रीश्रीमालीमण्डपवासी यो मालवाधिपतिमित्रम् ।
माफरमलिकेत्यपरं नाम धरन्मेघमन्त्रिवरः ॥ १०२ ॥
यस्याम्बादिकुटुम्बं पूर्वं श्रीसोमसुन्दरगुरूणाम् ।
भृशमनुरागभृदासीद् येष्वधुना यश्च सपरिकरः ॥ १०३ ॥
गुरुहाटकटङ्कयुतान् दशसेरमितांस्तु मोदकान् मधुरान् ।
निखिलजातिनिवासेष्वलम्भयद् मण्डपादौ सः ॥१०४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेदिन्यामुदकं यदेह न ददेऽम्भोदेन देहिव्रजे
युक्तः स्वाऽनुजजीवनेन गुणिना मेघस्तदानीमसौ ।
सत्रागारमुखं सृजन्नुरुवृषं सत्सङ्घसन्तोषकृद्
वृष्टः स्पष्टमहाबलः किल शुची रैटङ्कलक्षैः स्वरैः॥१०५॥
( चतुर्भिः कलापकम् )

एकद्वित्रिप्रभृतिभिरयुतैर्लक्षैरपि स्वटङ्कानाम् ।
ये जनिताः सद्भिरिह प्रायस्ते विस्तराः प्रोक्ताः ॥ १०६ ॥
येषां श्रीसूरिराजामपरिमिताजिनस्वामिमूर्तिप्रतिष्ठा-
चार्योपाध्यायमुख्यप्रवरपदविधानप्रशस्तिकैर्विस्तरा ये ।
न्यायाऽऽत्तप्राज्यवित्तव्ययकरणतया निर्मितास्ते मयाऽपि
ख्याता ज्ञाताश्च दृष्टा इह तु कतिपये वारके ये यदीये॥१०७॥
यैर्विबुधादिपदेषु क्रियमाणेषु क्षणाः प्रणीता ये ।
गृहिभिस्तत्परिमाणं न कोविदः कोऽपि कर्तुमलम् ॥ १०८ ॥
युगवरसमलक्ष्मीसागरा भव्यनव्या-
न्यतनुसुकृतकृत्यान्युत्सवैरेवमुर्व्याम् ।
परमगुरव एते निर्ममा निर्ममाणा-
श्चिरमिह विजयन्ते स्वाऽऽप्ततत्त्वं ब्रुवाणाः ॥ १०९ ॥
श्रीमन्मालवमेदिनीन्दुवदनालङ्कारहारप्रभो-
रुग्रामागरवासिकर्मतनयश्रीरत्नसङ्घप्रभोः ।
आक्षेपाद्विधुवेदवर्ष्मवसुधाब्दर्षे सुभिक्षोद्भवे
लक्ष्मीसागरसूरिराजविलसद्भाग्यप्रकर्षस्तवे ॥ ११० ॥
श्रीजम्बूसमसोमसुन्दरगुरोः श्रीसोमदेवाह्वयः
शिष्यः सूरिवरश्च शिष्यवृषभश्चारित्रहंसोऽस्य यः ।
तस्य श्रीविबुधस्य शिष्यशिशुना काव्ये मुदा निर्मिते



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्गोऽयं तु तृतीयको गुरुगुणाद्रत्नाकराख्यायुते ॥१११॥
( युग्मम् )

इति परमगुरुश्रीलक्ष्मीसागरसूरिविधीयमानश्रीजिनार्चाऽनूचानादिपदस्थापनावसरप्रौढोपासकप्रणीतोत्सवपरम्परावर्णनगर्भो गुरुगुणरत्नाकरनाम्नि काव्ये तृतीयः सर्गः ॥

अर्हम्

# अथ चतुर्थः सर्गः ।

श्रीजेसिंगमहीपाख्यरत्नमेघादिधीमताम् ।
यात्रादिविस्तरं वक्ष्ये जातं यद्द्वारकेऽद्भुतम् ॥ १ ॥
सोमसुन्दरसूरीन्द्रजनकस्वजनस्य च ।
पूर्वं पूर्वजनामानि रत्नाकस्य कति ब्रुवे ॥ २ ॥

यथा—

या श्रीविवेकाधिकगूर्जरत्रा-
भूभूषणाऽऽभाऽस्ति पुरी पवित्रा ।
सुवर्णपूर्णाऽचरसालराढा
लङ्कासमा सामढिकेति रूढा ॥ ३ ॥
तत्र प्रसर्पत्सुखंदाष्टिमान-
भुजाबलः पुण्यजनाधिपालः ।
नवग्रहादिप्रतिबन्धकारी
मन्दोदरीनाथतयाऽन्वितः सन् ॥ ४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राग्वाटवंशोदधिमध्यवर्ती
यो जैत्रसिंहो दशकन्धराभः ।
रामाद्यजेयः कुतुकं तु सोम-
गुरुसुन्दराणां पितृपूर्वजोऽभूत् ॥५॥
(युग्मम्)

तस्याङ्गभूरिन्द्रजिदिद्धऋद्धिः
कीनाशतामुक्तिलबूटडाख्यः ।
कालाभिधस्तस्य च सूनुरासीद्
दासीकृताऽसीमपुमान् महोभिः ॥ ६ ॥

कालात्मजाः षट् खलु नोडवेदा-
सद्राङ्गदेसामलधीरवीराः ।
तुर्यः सुतः सामलनामधेयो
यस्तेषु तेजस्विनरैरहार्यः ॥ ७ ॥

जज्ञेऽर्जुनाभः स जने सुभद्रा-
नुषङ्गरङ्गः स्वपरोपकारी ।
धर्मोद्गहोपास्तिपरोऽपि चक्रे
न भीमकृष्णाश्रयमत्र चित्रम् ॥८॥
(युग्मम्)

वेदाः किमेते कमनोद्भवत्वात्
किंवा समुद्राः कमलालयत्वात् ? ।
क्षोण्यां सकर्णैरिति वर्ण्यमाना-
श्चत्वार आसंस्तनयास्तदीयाः ॥९॥

यथार्थनामा धुरि सज्जनोऽभूद्
निम्बो द्वितीयः कटु-ता-पहारी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनाभिधानः सुमनास्तृतीयो
लम्पाकसंज्ञः सुकृती चतुर्थः ॥१०॥
(युग्मम्)

यः सज्जनः स्तोकधनस्ततः स-
मात्मीयनिम्बादिकुटुम्बयुक्तः ।
स लुप्तदुष्कालबलावकाशं
समागमद् मालवमध्यदेशम् ॥११॥

अथ तत्र तस्य वासस्थाननगरवर्णनम्-

यदा नृपाद्या विषमाद्रिवप्रा-
दिषु प्रनष्टाः परचक्रभीताः ।
यस्य प्रभावाद् यदभूत्तदार्य-
प्रजाभिराकीर्णमशङ्किताभिः ॥ १२ ॥

भूतग्रहोद्भावितदुष्टदोषा-
स्तुरुष्कचौरादिनरास्त्वशेषाः ।
यत्र स्थितं यत्पदपर्युपास्ते-
र्नोपद्रवन्त्यार्हतजन्तुजातम् ॥ १३ ॥

वीरस्य तस्यात्यवदातमूर्त्या
भ्राजिष्णुजैनालययुक्तमध्यम् ।
यत्रास्ति भूरिव्यवहारिरम्यं
तस्मिन् पुरं पर्णविहारसंज्ञम् ॥ १४ ॥

स्वबन्धुवर्गेण समं समोदं
स सज्जनस्तत्र चकार वासम् ।
योगो भवेद् यत्र च देवगुर्वो-
र्गृही हि तस्मिन् वसतिं विदध्यात् ॥ १५ ॥
(चतुर्भिः कलापकम्)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रम्भानिभा रूपरमाऽतिरेका
छेका विवेकादिगुणप्रवेका ।
श्रद्धावती साधुषु सार्वधर्मे-
ऽमुष्य प्रियाऽजायत पूर्णदेवी ॥ १६ ॥

जातस्तयोः सत्तनुरङ्गजन्मा
कर्माभिधः स क्रमतो महीयान् ।
यद्भागधेयाज्जनराज्यमान्यः
स सज्जनः प्राज्यधनोऽर्जानिष्ट ॥ १७ ॥

ततः स कर्माख्यकृती सवित्रा
सोमीति कन्यां परिणायितः सन् ।
बभूव भाग्याऽभ्युदयाद् महेभ्यः
सभ्यः सदभ्यस्तसमस्तविद्यः ॥ १८ ॥

अक्ष्यन्तरिक्षाक्षरसाङ्कवर्षे
यात्राकृते सिद्धधराधरादौ ।
यः प्राप सङ्घेशपदं प्रथीयो-
महेन भूयोविभवव्ययेन ॥ १९ ॥

अथ कर्माकस्य सुताख्याः-

तस्याङ्गजा जाग्रदभङ्गुराया
जातास्त्रयो रत्न-सुजेस-मेघाः ।
खाम्भी तथा माणिकिचारुहीरू
तिस्रः सुता रूपगुणैः प्रतीताः ॥ २० ॥

अथास्य वासस्थानाऽऽगरनगरवर्णनम्-

विचित्रपोतावलिशालिलोकं
हार्दं दधच्चन्द्रवसूदयेन ।

सरस्वतीधीवरजीवराजी-
लावण्यजित् पुण्यजिनालयं च ॥ २१ ॥
क्षमाधरैर्विप्रवरैरपारै-
रासेवितं वारिदवाहिनीभिः ।
यच्चाति नानाभवनाभिरामं
रत्नाकराभं सकलाक्षरम्यम् ॥ २२ ॥
गृहे गृहे साऽस्य पुरस्य नाम्न्या-
गरेतिरावोऽस्ति किलेति मत्वा ।
सरोमिषाद् यत्र च सागरेति
प्रापाऽर्णवः स्थापयितुं निजाह्वाम् ॥ २३ ॥
तत्तत्तटद्वीपभवानि साकं
तेनाऽऽगमन्नाङ्घ्रिरतिप्रदानि ।
रसालजम्बूमुखशाखिलेखा-
शालीनि यस्मिन् किमु काननानि ? ॥२४॥

अथ यत्रस्थजिनार्चावर्णनम्—

सदासितानन्तपदाश्रितस्य
श्रीपार्श्वभर्तुः पुरुषोत्तमस्य ।
मूर्तिर्जगन्नाथजुषां जनानां
यत्र स्थिता यच्छति वाञ्छितार्थम् ॥२५॥
सद्दक्षिणावर्तकशङ्खसाम्या
माहात्म्यरम्या नवपल्लवस्य ।
वामेयदेवस्य यदन्तरस्था
परा पिपर्ति प्रतिमा परं श्रम् ॥ २६ ॥
सत्रा सगोत्रैः स तडागराज्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्तः पुरं पर्णविहारपुर्याः ।
कर्मोककृत्युत्तमविश्वकर्मा
धर्मादराभ्यागतकामशर्मा ॥ २७ ॥
( सप्तभिः कुलकम् )

हरिप्रियाऽनेकसुपर्वलोक-
प्रत्तेष्टसन्तानवितानतारम् ।
स्वःसद्मवद्वासकृते च तस्मिन्
व्यधापयत्सौधमसौ धनीशः ॥ २८ ॥

अथास्य पुत्रत्रयवर्णनम्—

तेऽथ त्रयो रत्न-सुजेस-मेघा-
लोकेशलक्ष्मीशमहेशकल्पाः ।
धृतेन्द्रनागेन्दुघनोद्भवर्णाः
क्रमेण चाष्टादशवर्णवर्ण्याः ॥ २९ ॥

उपात्तहंसद्विजराजगजद्-
वृषाः सुखादिष्टपदाभिगत्यै ।
विज्ञातकौतूहललास्यरङ्गा
भान्त्यत्र चित्रं न कुशास्त्रसङ्गाः ॥ ३० ॥
( युग्मम् )

अथैषां कुटुम्बनामानि—

रत्नस्य सावित्र्युपमात्मरूप-
श्रिया प्रिया राजमिति प्रतीता ।
कर्णाभिधानस्तनुजश्च देव-
ब्रह्मेव वाग्वद् दुहिता रहीति ॥ ३१ ॥

जेसस्य जाया भ्रमरी रमेव
प्रियङ्करी प्राणभृतां नितान्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवाह्वयः सूनुरनूनरूप-
स्मरोपमः पुण्यगुणैरुपेतः ॥ ३२ ॥
मेघस्य जन्योर्युगलं सुशीलं
देपूश्च रङ्गीरिति राजतेऽलम् ।
गौरीनिभा भूतगणे हिताऽऽद्या
गङ्गेव पुण्यैकरसालयाऽन्या ॥ ३३ ॥
( त्रिभिर्विशेषकम् )

न्यायार्जिताऽन्यूनधना वदान्या-
धन्याऽधिपास्तेऽवनिजानिमान्याः ।
तेजोयशोभासुरसङ्घमुख्या-
भान्ति त्रयोऽर्हद्गुरुभक्तिदक्षाः ॥ ३४ ॥

अथैषां पुण्यकरणीयमाह्–

त्रिधा विशुद्धया विधिपूर्वमुग्रं
तेपे तपः पञ्चमिकातिथेस्तैः ।
तस्मिन्नमेऽस्याद्भुतकृज्जनाना-
मुद्यापनं नन्दनकाननाभम् ॥ ३५ ॥

तद्यथा–

सच्चर्मलाः पुस्तकशालिताग्राः
पञ्च स्थिताः स्थापनिका यदन्तः ।
वेल्लल्लतावेष्टितपत्रशाखाः
कल्पद्रवोऽमर्त्यमता बभुः किम् ? ॥ ३६ ॥
चन्द्रोदयाश्चित्रचिता अपूर्व-
शचीवराढ्यैर्विहिता विमानाः ।
सर्वाङ्गसत्राणि च बिम्बपत्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण्यदुः प्रमोदं सुमनोजनानाम् ॥ ३७ ॥
कुम्पाः कपर्द्दादिमया ग्रुकुम्भाः
सश्रीकवर्णोद्भवहेतुभूताः ।
किमक्षमाला विविधप्रकाराः
कामप्रदाः कामदुघाश्च यत्र ? ॥ ३८ ॥
किं कैरवाण्यक्षवराः सुराद्रेः
पादास्तु रीरीकलशाः पृथूच्चाः ।
सल्लेखिनीकर्तरिकर्जुकम्बी-
छुर्यादयोऽर्था विहगा विचित्राः ? ॥ ३९ ॥
सखञ्जिकार्यांशुकपृष्ठकानि
नानाऽम्बुजालीयुतपल्वलानि ।
किं पञ्चवर्णानि वरेण्यपट्ट-
सूत्राणि सूनस्तवकाश्च यस्मिन् ? ॥ ४० ॥
वाप्यो गभीराः किमु वासकुम्प्यः
समुद्गका वर्तुलदीर्घिकाश्च ।
सन्मोदका मेदुरकन्दुकाभाः
क्रीडाकृतेऽस्मिन् विबुधव्रजानाम् ? ॥ ४१ ॥
यत्रौरसाः केसरिविष्टराणि
सद्धपधानानि च वाहनानि ।
स्वज्जानि सज्जानि च चत्वराणि
नाकौकसामप्युपवेशनाऽर्थम् ॥ ४२ ॥
पत्राणि चित्राणि फलान्यनेक-
विधानि किं कल्पतरूद्भवानि ? ।
शाल्यादिशस्यानि च पेशलानि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवालमुक्तामणिमण्डलानि ॥ ४३ ॥
श्रीधर्मशालासुरशैलमद्या-
मेवंविधं स्वर्वनतुल्यमेतत् ।
येऽरीरचन् सज्जनरञ्जनार्थ-
मुद्यापनं मेदुरधर्मरङ्गाः ॥ ४४ ॥
( नवभिः कुलकम् )

तत्र क्षणे क्षान्तिमतां मुनीना-
मर्चामकार्षू रुचिरैश्च चीरैः ।
समीक्षणायाऽस्य च मीलितानां
स्वान्याऽमितग्राममहाजनानाम् ॥ ४५ ॥
( युग्मम )

षड्दर्शनीयाचकजन्तुराशे-
राज्यादियुग्जेमनवित्तदानैः ।
तेषां निवासेऽनिशमास्ति सत्रा-
गारः क्षुधानाशकरोऽनिवारः ॥ ४६ ॥
प्रौढोत्सवं कल्पचरित्रसत्कं
प्रायः प्रकुर्युः प्रतिवर्षमेते ।
सप्तस्वपि प्रत्यहमार्हतेषु
क्षेत्रेषु हर्षाद् वपनं धनस्य ॥ ४७ ॥

अथ विशेषतो रत्नगुणवर्णनम्-

वितीर्णवान् कर्णनृपः सुवर्ण
दिनैकयामावधि याचकेभ्यः ।
योऽहर्निशं धान्यहिरण्यचीर-
दाता ततः सोऽस्य समः कथं स्यात् ? ॥ ४८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीवस्तुपालादिवदान्यमौलि-
ष्वाश्चर्यकृद् भास्यति रत्नवद् यः ।
दानादिपुण्यप्रथयेति मत्वा
रत्नाभिधां यस्य विधिर्व्यधत्त ॥ ४९ ॥

सद्वंशजं चापनिभं गुणाढ्यं
यमाश्रयद् मार्गणमालिकाऽरम् ।
आसाद्य सारं सुखभोगमस्माद्
महीधरानप्यधरीकरोति ॥ ५० ॥

यो धान्यदानाज्जगडूपमानः
श्रीसङ्घभक्त्या जगसीसमानः ।
द्रव्यव्ययी पेथडवद् वृषार्थं
सारङ्गवद् बन्दिविमोच्यथाऽऽस्ते ॥ ५१ ॥

तेष्वादिमस्याऽऽस्तिककुञ्जरस्य
तस्याऽथ रत्नस्य मनस्युदारे ।
श्रीतीर्थयात्राकरणाय कामं
मनोरथः प्रादुरभूद् महीयान् ॥ ५२ ॥
( पञ्चभिः कुलकम् )

ततोऽर्थिवीथीपृथुदौःस्थ्यदावो-
पशान्त्यमोघाऽनघदाननीरैः ।
मेघेन मेघप्रतिमेन सार्कं
सालोचयामास निजाऽनुजेन ॥ ५३ ॥

स्वजामिमाणिक्यविवोढुरप्ये-
तज्ज्ञाप्यते भोः! जयसिंहसाधोः ।
मेघोऽपि रत्नं प्रति हृष्टचेता-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यात्रोत्सुकश्चेति झगित्यवोचत् ॥ ५४ ॥

अथ सारङ्गपुरवासिसं० जेसिंग-वर्णनम्-

यः सङ्घमुख्योऽखिलखानखोजा-
　मीरुम्बराद्यैर्बहु मानितश्च ।
निःस्वाऽऽदिसत्त्वोद्धरणाय सत्रा-
　गारं गरिष्ठं सततं विधाता ॥ ५५ ॥
श्रीसारसारङ्गपुराधिवासी
　जेसिंगसाधुर्विनयी विवेकी ।
जीरादिपल्ल्यर्बुदतीर्थयात्रां
　चिकीर्षुरासीदिह दानशौण्डः ॥ ५६ ॥
विज्ञैर्विधेया त्वरितं भवद्भिः
　श्रीतीर्थयात्राकृतिसञ्जिका भोः ! ।
तदैव रत्नप्रभृतेः स्वकल्वा-
　दित्यागरे ज्ञापितवांस्ततोऽसौ ॥ ५७ ॥

( त्रिभिर्विशेषकम् )

इष्टं तथा वैद्यवरोपदिष्ट-
　माभाणकोऽभ्याऽभवदेष सत्यः ।
सखा वृषार्थी यदयादथेदृग्
　ज्ञायेत रत्नादिभिरित्यचिन्तयत् ॥ ५८ ॥
निमन्त्र्य यात्राकृतये सगोत्रान्
　छाजूमुखान् स्वान् सकलान्वितश्च ।
हंसादिसङ्घाधिपतीननेकान्
　कांश्चिन्नरान् वाहनवित्तदानैः ॥ ५९ ॥
संमील्य सङ्घं घनमागरादे-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

राडम्बरै राजबलानुकारैः ।
कुटुम्बयुग् यावददोषलग्ने
प्रस्थानकेऽस्थात् प्रमदात् स रत्नः ॥ ६० ॥
( युग्मम् )

मेलाखनामण्डनयुग्महीपा-
हरिभ्रमाजाजकलक्षमुख्यैः ।
सीणोरकद्रङ्गनिवासिभिर्य
युक्तं प्रभूतैर्व्यवहारिवर्गैः ॥ ६१ ॥

तथा च सिन्दूरपुरादिसंस्थै-
स्तावत् स सारङ्गपुराच्चतुर्थो ।
सङ्घं समादाय महीपसन्तं
जेसिंगसाधुर्मिलितश्च तस्य ॥ ६२ ॥
( युग्मम् )

पर्यङ्किकाः प्राज्यरथांस्तुरङ्गान्
परःशतान् वेगसरान् गवोष्ट्रान् ।
उपस्कराद्यैः शकटांश्च सज्जी-
कृत्यार्हतामुन्नतये मनस्य ॥ ६३ ॥

सत्का यथा पर्णविहारकादे-
स्ततः पुरो मीलितभूरिसङ्घौ ।
जेसिंगरत्नौ सुखदप्रयाणैः
प्राप्तौ पुरं तौ रतलामनाम ॥ ६४ ॥
( युग्मम् )

श्रीमण्डपोर्वीधरसीवलीया-
भूर्वासिनः सङ्घगणैः समेताः ।
मन्त्रीश्वजाऊसहजादयस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदागमंस्तत्र निशम्य सद्यः ॥ ६५ ॥

धारोज्जयिन्यादिबृहत्पुरास्था-
स्त्वन्येऽपि धन्या बहवस्तदानीम् ।
सङ्घे तदीये मिलिता महेभ्याः
सिन्धुप्रवाहा इव वार्धिमध्ये ॥ ६६ ॥
( युग्मम् )

ततो महेन्द्रीतटवागडादौ
स मालवीयः सकलोऽपि सङ्घः ।
सर्पन् प्रतिग्रामपुरं जिनेन्द्र-
स्नात्रादिपुण्यं प्रथयन् हितार्थम् ॥ ६७ ॥

कुमारपालादिककारितार्ह-
त्प्रासादसौधर्द्धिविधूतनाकम् ।
श्रीराजदेशाभरणं समागा-
दीयद्दरं नाम पुरं क्रमेण ॥ ६८ ॥
( युग्मम् )

अथास्य समग्रसङ्घस्य वर्णनम्-

किं सार्थवाहो बहुवस्तुशस्तः
किं वा सुरत्राणबलं विशालम् ? ।
इत्याव्रजन्तः कति यत्र लोका
दूराद् यमालोक्य विकल्पयन्ति ॥ ६९ ॥

यस्मिन् महेशान् बहुशो वृषस्थान्
सतीगणांश्चाऽद्रिपतीर्निशम्य ।
तान् द्रष्टुमागात् सितभृङ्गसङ्गी
गुरूदरालीव्यपदेशतोऽसौ ॥ ७० ॥

पटादिकुट्यौघघनाभ्रपङ्क्त्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भर्मादिभूषाद्युतिविद्युता वा ।
भेर्यादिवाद्यारवगर्जितेन
विभ्राजितस्त्यागपयश्चयेन ॥ ७१ ॥
नृत्यद्भ्रमद्याचककेकिचक्र-
प्रोच्चार्यमाणाऽमितकीर्तिकेकः ।
नभ्राड्निभो भाति तदाश्रितां गां
धत्ते न योऽन्तः किल कृष्णभावम् ॥ ७२ ॥
( युग्मम् )
यत्र प्रसर्पद्धनसारवारा-
वासान् घनः प्रेक्ष्य सतः समुद्रान् ।
स्वाभ्राणि तोयग्रहणाय तेभ्यः
प्रैषीत् प्रलम्बाम्बरसद्मदम्भात् ॥ ७३ ॥
( पञ्चभिः कुलकम् )
केषां हि केषामिह पूरुषाणां
काराप्यते सङ्घपतित्वपुण्ड्रः ।
सम्भूय सङ्घेऽथ मिथः समेऽस्मि-
न्नालोचमेवं व्यधुरिभ्यसभ्याः ॥ ७४ ॥
अथेलदुर्ग—भूपालवर्णनम्—
भयेति वर्णद्वयमात्मदेशाद्
निष्काश्य येनाऽथ पृथग् विधाय ।
एकैकमस्थापि तमेव विश्वे
स्फूर्जन्निजाह्वायशसोरिवादौ ॥ ७५ ॥
तत्राधिनेताऽस्ति स भानुनामा
धामाऽस्तमाद्यद्विषमारिवर्गः ।

न्यायेन रामः सुकृताभिरामः
श्रीसार्वभौमस्तनुरूपकामः ॥ ७६ ॥
( युग्मम् )

तस्येशितुर्हाटकटङ्कपट्ट-
कूलादिकं ढौकनमभ्यकार्षुः ।
जेसिंगरत्नाद्यमहीपमुख्या-
स्तेनाऽपि बाढं बहु मानितास्ते ॥ ७७ ॥

स्नात्रध्वजारोपणपात्रनृत्या-
द्युत्युत्सवैः श्रीऋषभादिपूजाम् ।
विरच्य तत्राऽर्हतमन्दिरेषु
ववन्दिरे श्रीगुरवस्ततस्ते ॥ ७८ ॥

श्रीवाचकैर्निङ्घवरैश्च लब्धि-
समुद्रसंज्ञैरथ यद्विनेयैः ।
यावल्ललाटे तिलकः स चक्रे
जेसिंगरत्नादिधनीश्वराणाम् ॥ ७९ ॥

भेरीनफेरीस्वरनायकादे-
राकर्ण्य नादं तरणेश्च तावत् ।
त्रस्तास्तुरङ्गास्तदितस्ततोऽगु-
स्तेनारुणः सोऽपि रुषाऽभवत् किम् ? ॥ ८० ॥

वाचंयमाचारचनात् सुदृष्टि-
रैरूप्यटङ्कादिसमर्पणेन ।
तेऽथाऽर्थिनां पञ्चविधार्थदानात्
ततो वितेनेऽद्भुतविस्तरैस्तैः ॥ ८१ ॥

श्राद्धास्तदा ते च बभूवुरुष्टा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीतिप्रमाणाः किल सङ्घनाथाः ।
अर्हन्मतौन्नत्यकृतिप्रवीणा
धर्मिष्ठसान्निध्यधुराधुरीणाः ॥ ८२ ॥
सश्रीभरामारजनीसुवर्णाः
सद्राशिसङ्गाश्च सुखप्रसाराः ।
ये रेजुरस्तात्मतमःप्रचारा-
स्तुल्या वसुग्रावमितग्रहाणाम् ॥८३॥
तेष्वग्रिमौ श्रीजयसिंहरत्नौ
स्ववासरोषाभरणातिशोभौ ।
स्तः पुष्पदन्तप्रतिमौ त्वपूर्व-
तुरङ्गभाजौ वसुभासितोर्व्यौ ॥ ८४ ॥
नत्वा जिनेशान् सुगुरूनरेशा-
ऽऽदेशात्ततस्ते शकुनैः प्रशस्यैः।
श्रीपार्श्वनाथं मनसि स्मरन्तः
सन्तः पुरश्चेलुरथेलदुर्गात् ॥ ८५ ॥
द्विजिह्वराजे विपदन्तरिक्षे
रजोव्रजो नोभयमस्ति सङ्घे ।
तदाऽध्वगच्छच्छकटाश्वचक्र-
धाराखुरोत्खातधरातलेऽस्मिन् ॥८६॥
ते च प्रतिग्राममभङ्गतुङ्ग-
प्रासादसार्वप्रतिमाऽतिनीनाम् ।
पूजां सृजन्तः क्रमतः समीयुः
श्रीजीरिकापल्लिपुरं ससङ्घाः ॥ ८७ ॥

अथ तत्रस्थश्रीपार्श्वनाथवर्णनम्–

यन्नाममन्त्रस्मृतिमात्रतोऽपि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोगा दरा दुष्टनराश्च नाशम् ।
सर्वे प्रयान्तीप्सितसिद्धयः स्युः
काले कलावप्यखिलाङ्गभाजाम् ॥८८॥
शश्वच्छिवाभोगपरस्त्रिलोकी-
व्यापी क्षितोद्यत्कलिकालकेलिः ।
संभूयते यस्य गुरुप्रभावः
प्रणम्रभूतार्पितभूरिभूतिः ॥ ८९ ॥
( युग्मम् )
तैस्तत्र यावद्ददृशे जिनेशः
श्रीपार्श्वनाथः प्रथिताऽर्थसार्थः ।
चक्षूंषि तावत् पुपुषुस्तथैषां
पीयूषयूषेण यथाऽऽर्द्रितानि ॥ ९० ॥
श्रीनालिकेरादिफलानि तस्य
प्रभोः पुरस्तेऽपि च ढौकयित्वा ।
नवाङ्गपूजां कनकादिटङ्कै-
र्निर्माय निर्मायहृदा प्रणामम् ॥९१॥
अर्थिष्वथाऽर्थाभरणादिदानं
दत्त्वा ततस्तोयपवित्रिताङ्गाः ।
अर्चैकरङ्गाः परिधाय पट्ट-
पदादिवासांसि शुचीनि सद्यः ॥९२॥
लात्वा सुगन्धीनि सुमानि भोगं
कर्पूरकृष्णागुरुमिश्रितं च ।
क्रोशप्रमाणध्वजदानपूर्वं
सविस्तरं स्नात्रमहं वितेनुः ॥ ९३ ॥
( त्रिभिर्विशेषकम् )

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीआश्वसेनेरखिलप्रकारै-
रर्चां विरच्य स्वकचित्तभक्त्या ।
अमूमुचंस्ते च पुरागृहीता-
नभिग्रहानुग्रतरांस्तदग्रे ॥ ९४ ॥

दिनत्रयं चक्रतुरत्र सत्रा-
गारं गरिष्ठं जयसिंहरत्नौ ।
दुर्जेयदेवायतकोलिकोप-
कण्ठाद् व्यधाद् वन्दिविमोक्षमाद्यः ॥९५॥

अथ श्रीपार्श्वप्रभोः पुरस्ताद्विज्ञप्तिकविः—

देवस्त्वमेवासि युगेऽत्र जाग्र-
त्प्रभावधर्ताऽभिमतार्थकर्ता ।
प्रभेद्युषामुल्वणसाध्वसोप-
द्रवापहर्ताऽपि च मुक्तिभर्ता ॥ ९६ ॥

याऽऽसीदद्दृष्टे त्वयि नो दिदृक्षा
साक्षाच्च दृष्टेऽपि जिनाऽधुनाऽलम् ।
सा वर्धते पार्श्वविभोः पुरस्ताद्
विज्ञप्तिमेवं विबुधा व्यधुस्ते ॥ ९७ ॥
(युग्मम्)

वामेयदेवं विनयेन धीरा-
पल्लीललाम प्रणिपत्य धीराः ।
चिकीर्षवश्चार्बुदतीर्थयात्रां
समाययुस्ते तदुपत्यकायाम् ॥९८॥

ततोऽर्बुदाऽद्र्यध्वनि सङ्घलोको-
दन्याभिदे रत्नमुखा वदान्याः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सितोपलामिश्रितशीततोयैः
प्रपाः प्रतिस्थानमबीभरंस्ते ॥ ९९ ॥
धन्यास्तमारुह्य महीधरेशं
प्रापुश्च यावत्तदधित्यकायाम् ।
सङ्घैः समं ते ददृशुर्जिनेन्द्र-
चैत्यानि तावत् पुलकाङ्किताङ्गाः ॥१००॥

अथ श्रीअर्बुदतीर्थवर्णनम्-

उत्तुङ्गताया विपिनश्रिया वा
किं भूभृताऽनेन जितो हिमाद्रिः ।
श्वेतानि सर्वज्ञयुतानि सोऽस्यै-
तानि स्वशृङ्गाण्युपदीचकार ? ॥१०१॥
किंवा विमाना इह नन्दनाद-
प्यारामराढामधिकामवेक्ष्य ?।
देवाधिदेवस्य हि देवनाया-
यातस्य सद्विस्मयदायिनस्ते ॥१०२॥
व्याप्ते त्रिलोके कलिनाऽऽशु कल्कै-
र्धर्माः समस्ताः किमु मूर्तिमन्तः ? ।
तस्थुर्वलक्षा इह के तदाऽर्ह-
द्धर्म्याणि वीक्ष्येति विकल्पयन्ति ॥१०३॥
( त्रिभिर्विशेषकम् )

तेष्वादिदेवादिजिनाधिनाथा-
नद्राक्षुरानिद्रदृशः कृतीन्द्राः ।
ते यावता दूरितदुःखतापा-
स्तावन्मुदाऽद्वैतभृतश्च जाताः ॥१०४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो वसत्यां विमलादिमायां
स्नात्रोत्सवे तैस्तु विधीयमाने ।
द्वात्रिंशता स्फाव्यशतैः सपर्या-
ऽधादिन्द्रमालां जयसिंहसाधुः ॥१०५॥
स्वप्रेयसीयुक् तदनूपविश्य
श्रीकारिराजादिमवाहनेऽसौ ।
दानं ददौ गैरिककुञ्जराढ्यं
सत्कीर्तिकृत्युत्सुकयाचकेभ्यः ॥१०६॥
चन्द्रोज्ज्वलास्यः कृतपङ्कनाशः
क्षणात्क्षमाभृज्जनपूरिताशः ।
ववर्ष तत्रावसरेऽर्बुदेऽसौ
सौवर्णटङ्कैर्नवमेघतुल्यः ॥१०७॥
( त्रिभिर्विशेषकम् )
पञ्चालिकाकोरणिकागजादि-
रूपेक्षणप्रत्तजनाद्भुतेषु ।
सर्वास्वचैत्येषु युगादिमुख्या-
नानर्च देवान् विधिना ततो यः॥१०८॥
श्रीअर्बुदेलामहिलाललाम !
श्रीनाभिसूनो ! सुमनोऽर्च्यधामन् !।
याऽऽस्ताऽभिरूपे भवदीक्षणार्थो-
त्कण्ठालता भाक् स्वहृदालवाले ॥१०९॥
सा सिच्यमाना तव भक्तिवारा
त्वयीक्षितेऽद्येष्टफलैः पफाल ।
विज्ञप्तिमित्यादिविभोः पुरस्तात्

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तेने कृतार्थेन सता च येन ॥११०॥
जिनान् नमस्कृत्य पुनर्नगेन्द्रा-
दुत्तीर्य तस्मादखिलः स सङ्घः ।
चैत्याग्ररैकुम्भभगास्तदोषां
सीरोहिकाह्वां नगरीमथागात् ॥१११॥
( चतुर्भिः कुलकम् )

लक्षाख्यराज्ञोऽपि यदातिहृद्या-
ऽऽच्छादादिकं प्राभृतमत्र चक्रुः ।
जेसिंगरत्नप्रमुखास्तदानी-
मदादमीषां बहुमानमेषः ॥ ११२ ॥

आदीश्वरादीनभिवन्द्य देवान्
प्रासादपङ्क्तौ सुगुरूंस्ततस्ते ।
गुरुध्वजारोपणपात्रनृत्य-
गीताद्भुतं स्नात्रविधिं वितेनुः ॥११३॥

ततश्च सूरित्रयवाचकादि-
वाचंयमानेकशतान्वितान् यान् ।
श्रीपूज्यपादान् प्रमदात् प्रणेमु-
स्ते पुण्यवन्तः समभासहैः ॥११४॥

अथ रत्नाकस्य गच्छपरिधापनिका मनोऽभि-
प्रायांश्च प्रोचे–

नाकर्ण्यते यद्धनिनाऽऽत्मयात्रा-
यातेन केनाऽपि कृतं जनेन ।
कुर्वेऽत्र तत्सम्प्रति नव्यपुण्यं
दध्यावसौ रत्नकृतीति चित्ते ॥११५॥

श्रीसोमपूर्वाचलसुन्दरैक-

करोदये ये निजगोत्रजाताः ।
सर्वे समुद्रा वसुतोयवन्तः
सन्तः पुराऽऽपुः परितो गुरुत्वम् ॥११६॥

अहं हि मेघादिकषङ्करश्री-
रत्नाकरोऽस्मीह च तत्सगोत्रः ।
विमानयानस्तु तमोविहीन-
श्चकास्ति तत्तारगणोऽधुनाऽहम् ॥११७॥

वीक्ष्यैनमप्यङ्गशुचिं वसत्यां
प्रीतिं बरीभर्ति मनो मदीयम् ।
ततोऽहमप्यम्बरदानतोषी-
ल्लासं करोमीति विचिन्त्य रत्नः ॥११८॥

लक्षक्षमेशाऽखिलराजकार्या-
ऽधिकारपुर्योज्ज्वलकार्यकार्दैः ।
सार्धं विचार्य व्यवहारिवर्यैः
श्रीपूज्यपादान स पुनर्ननाम ॥११९॥

( चतुर्भिः कलापकम् )

अथ गुरोरग्रे रत्नविज्ञप्तिकृतिः—

यथा यतेन्द्रैः परिधापितः स-
द्वेषैरशेषोऽपि तपागणोऽयम् ।
मनोरथो मेऽपि ततोरुरास्ते
चित्ते पुरे तद्विषये जयेच्छोः ॥१२०॥

स चाऽधुना प्राक्तनपुण्ययोगात्
प्रवर्धते साधुगणं समीक्ष्य ।
साफल्यमस्यात्र भवत्प्रसत्त्या-

ऽस्त्वेवं स तान् विज्ञपयाञ्चकार ॥१२१॥
( युग्मम् )

प्रसादमासाद्य च मङ्क्षु येषां
सीरोहिकाया बहिरग्रमह्याम् ।
स मण्डपान् मण्डयति स्म तुङ्गान्
क्षौमाम्बराच्छादितमध्यदेशान् ॥१२२॥

संमील्य सङ्घं स्वपुरं समग्रं
भूभृच्चतुर्वर्णनृणां समक्षम् ।
नानानटीपेटकवाद्यभट्ट-
गन्धर्वगानाद्यतिविस्तरेण ॥ १२३ ॥

श्रीसूर्युपाध्यायबुधाद्यनेका-
नगारवारैः सह गच्छराजान् ।
आकार्य लक्ष्म्यादिमसागरान् या-
नर्चां वरां तत्र चकार रत्नः ॥१२४॥
( त्रिभिर्विशेषकम् )

आनाय्य वर्यांशुकसम्भृतानि
सतां मनांसीव महान्त्यनांसि ।
ततः शतत्रय्यनुमानयुक्त-
व्रतिव्रजस्याऽर्पयति स्म वेषान् ॥१२५॥

ततोऽन्यपर्क्षीयकियद्यतीशान्
प्रतीह तानेष कृती वितीर्य ।
श्रीसङ्घलोकप्रकरस्य रूप्य-
टङ्कादि ताम्बूलमदाच्च मोदात् ॥१२६॥

साधर्मिकाणां विविधप्रकारै-
र्विधाय वात्सल्यमतुल्यभोज्यैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनीपकानां पुनरर्थदानै-
रमानि रत्नेन जनुः कृतार्थम् ॥१२७॥
कुर्वन्तमीदृग्वृषमेक्ष्य चैनं
छाजू-सुखेतावपि तत्सगोत्रौ ।
श्रीमालवाधीश्वरमन्त्रिजाऊ-
र्वेषानदुस्तेऽमितपण्डितानाम् ॥१२८॥
( चतुर्भिः कलापकम् )

ये मेदपाटपचुआरकगूर्जरत्रा-
सौराष्ट्रदक्षिणमरुस्थलमुख्यदेशाः ।
तेषु स्थितिं विदधतां व्रतिनां सतीनां
प्रैषीत् तदेव वरवेषभरं स रत्नः ॥ १२९ ॥
श्रीत्राणराणपुरमौलिचतुर्मुखोच्च-
प्रासादमण्डनजिनेश्वरराजयात्राम् ।
सङ्घेन साकमकरोत् कियता तदानी-
मेवाथ रत्नलघुसोदरमेघराजः ॥ १३० ॥
जिनवरगुरुपादांस्ते प्रणम्य प्रणीता-
ऽप्रमितसुकृतकृत्याः सङ्घनाथाः ससङ्घाः ।
निरुपमनगरश्रीसव्वसीरोहिकाया-
निजजनपदमन्वौत्सुक्यभाजः प्रतस्थुः ॥ १३१ ॥
ततो लक्षक्ष्मापप्रभृतिकृतिसंप्रेषणतया
रयादायातास्ते पथि कुशलिनो मालवभुवम् ।
धनैर्मानैरर्थिप्रकरमिह सन्तोष्य सुखद-
प्रयाणैः सङ्घेशा निजनिजपुरं प्रापुरखिलाः ॥ १३२ ॥
श्रीसङ्घेन ततस्तदागरपुरे रत्नस्य सङ्घप्रभो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेर्याद्यारवगीतनृत्यरुचिरश्चक्रे प्रवेशोत्सवः ।
कृत्वा देवगुरूचिताचेनविधिं तेनाऽप्यसौ सत्कृत-
स्ताम्बूलप्रथनान्महासहिरिकीहूणप्रतापादिभिः ॥१३३॥
निखिलमुनिवराणां मालवे रत्नसाधुः
प्रतिनगरमथैष प्रेषयामास वेषान् ।
निजपुरि च नवीनोपागतस्वाऽपरश्री-
विबुधगणधरादेः सङ्घपूजाविधायी ॥ १३४ ॥
साधवो वृद्धशालीयास्तथा खरतराह्वयाः ।
अञ्चलागमगच्छीया नैके वटगणाश्रयाः ॥ १३५ ॥
पूर्णिमिकाः पुनर्नाणानाणा बालादयश्च ये ।
केचिदागरमागुस्ते रत्नेन परिधापिताः ॥ १३६ ॥
रत्नमेघमहेभ्याभ्यां वेषैरेषाऽनगारिणाम् ।
परिधापनिकाऽऽरब्धा १५२८दिग्दोर्देहेन्दुहायने ॥१३७॥
श्रुत्वैतं यच्छन्तं रत्नं वेषानशेषगच्छानाम् ।
तपागणः कतिकृतिभिस्तैः परिधापयितुमारेभे ॥ १३८ ॥
एवं पुण्यानि नित्यं जगति विदधतः सद्विवेकस्य मेघा-
जीवाकर्णाद्यभीष्टस्वजनपरिवृतस्याऽधुना रत्नसाधोः ।
देवाणोदीपकस्याऽप्रतिहतवचसो दानशौण्डाग्रवृत्तेः
कीर्तिर्देशेषु सर्वेष्वपि विशदतरा सर्वतः पोस्फुरीति॥१३९॥
श्रीमन्मालवमेदिनीन्दुवदनालङ्कारहारप्रभो-
रुग्रामागरवासिकर्मतनयश्रीरत्नसङ्घप्रभोः ।
आक्षेपाद्विधुवेदवर्षमवसुधा१५४१वर्षे सुभिक्षोद्भवे
लक्ष्मीसागरसूरिराजविलसद्भाग्यप्रकर्षस्तवे ॥ १४० ॥
श्रीजम्बूसमसोमसुन्दरगुरोः श्रीसोमदेवाह्वयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिष्यः सूरिवरश्च शिष्यवृषभश्चारित्रहंसोऽस्य यः ।
तस्य श्रीविबुधस्य शिष्यशिशुना काव्ये मुदा निर्मिते
सर्गश्चात्र चतुर्थको गुरुगुणाद् रत्नाकराख्यायुते ॥१४१॥
( युग्मम् )

इति श्रीपरमगुरुश्रीलक्ष्मीसागरसूरिभाग्यादिगुणवर्णनगर्भे गुरुगुण-रत्नाकरनाम्नि काव्ये सं०रत्ना-मेघा-सं०जेसिंग-कृतयात्रा-विस्तरमहश्चतुर्थः सर्गः ॥

---

यस्मिन् देशे विहारं विदधति यतिपा ये चतुर्मासकं वा
तस्मिन् देशे सुभिक्षं भवति, न तु कदापीतिसंभूतिभीतिः ।
येषां माहात्म्यमीदृग्विधमिह विबुधैर्ज्ञातमास्ते नृपाद्यैः
श्रीलक्ष्मीसागराख्या गणधरगुरवः सन्तु वस्ते शिवाय ॥१॥
यत्कः प्राश्वत्प्रतापः सवितुरतिशयी भूर्भुवःस्वःप्रकाशी
येषामास्ते यशोऽपि शपितुरभिनवं तामसध्वंस्यदोषम् ।
मुक्तापङ्क्त्या यदीया गुणततिरधिका छिद्रमुक्ताऽपि तन्यात्
यत्पुंसां कण्ठकान्ति तदिह गुरुवराः केन तुल्याः स्युरेते ?॥२॥
हंहो ! गच्छत मा विदूरविषयान् वज्राकरं वाऽर्णवं
धातोर्वादविधौ भ्रमे पतत मा दुर्मन्त्रयन्त्रादिके ।
भूत्यर्थं भविकाः ! भजध्वमऽनिभानेतान् यथार्थाऽभिधान्
लक्ष्मीसागरगच्छनायकवरान् सर्वार्थसिद्धिप्रदान् ॥ ३ ॥

समेरुरत्नाकररत्नगर्भा
विभास्वरौ राजरवी च यावत् ।
राजन्ति जैनेन्द्रमतं जनेऽस्मिं-
स्तावन्नवं नन्दतु काव्यमेतत् ॥ ४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीपूज्यमाज्यभाग्याभ्युदयगुणमयं सोमचारित्रसाधुः
काव्यं नव्यं व्यधात् तत्स्वनयनविषयं प्रापणीयं प्रसन्नैः ।
आचार्यैर्वाचकैर्वा बहुविबुधवरैर्वीतदोषं विधेयं
तद्वद्विद्वज्जनानामिदमिह सदसि स्यान्मुदे वाच्यमानम् ॥५॥

तथा—

श्रीअभयनन्दिविबुधा आगमचारित्रपण्डिताश्च यके ।
विजयन्ते, कविरेतद्विरचितवांस्तत्प्रसत्तिपदम् ॥ ६ ॥

इति सम्प्रतिविजयमानपरमगुरुपादश्रीलक्ष्मीसागरसूरिभाग्यसौ-
भाग्यादिगुणवर्णनगर्भं गुरुगुणरत्नाकरनामाऽभिरामं
काव्यं संपूर्णम् ।

पूज्याराध्यध्येयतमश्रीगच्छाधिराजभट्टारकपुरन्दरश्रीसोमसुन्दरसूरि-
शिष्यशिरोऽवतंसकसकलसकर्णपुरुषश्रेणीप्रणीतपदपद्मसेवभट्टारक-
प्रभुश्रीसोमदेवसूरिशिष्यशिरोमणिपूज्याराध्य पं० चारित्रहं-
सगणिपादविनेयपरमाणुना सोमचारित्रगणिना विर-
चितो ग्रन्थः संपूर्णः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org